रत्नशास्त्रम्

रत्नदीपिका of श्री चण्डेश्वर and ~~रत्नपरीक्षा~~ of Buddha Bhaṭṭa — Edited with Introduction by P. S. Rāma Śāstrī — Two treatises on Gemology. (Madras Government Oriental Series No. 78), Madras, 1951.

~~2 copies~~

(25) 30

1290

Bill No. 3/07-08

64

2008-0216

Indira Gandhi National Centre for the Arts

MADRAS GOVERNMENT ORIENTAL SERIES

No. LXXVIII

Indira Gandhi National
Centre for the Arts

# रत्नदीपिका
# रत्नशास्त्रम् च

# RATNA DĪPIKĀ
AND
# RATNA S'ĀSTRAM

1290

MADRAS GOVERNMENT ORIENTAL SERIES

PUBLISHED UNDER THE AUTHORITY
OF THE
GOVERNMENT OF MADRAS.

*General Editor*

T. CHANDRASEKHARAN, M.A., L.T.,

Curator, Government Oriental Manuscripts Library,
Madras

Indira Gandhi National
Centre for the Arts

No. LXXVIII

# रत्नदीपिका
# रत्नशास्त्रम् च

PRINTED AT
THE SREEVATHSA PRESS
ROYAPETTAH, MADRAS.

Indira Gandhi National
Centre for the Arts

# RATNA DĪPIKĀ
## AND
# RATNA S'ĀSTRAM

EDITED WITH INTRODUCTION

BY

SRI. P. S. RAMA SASTRI
*Professor, Madras Sanskrit College, Mylapore.*

Indira Gandhi National
Centre for the Arts

GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

1951

[redacted]

1290

KALANIDHI
Rare Book Collection
IGNCA
ACC No.: R-216
Date: 26.3.08

Indira Gandhi National
Centre for the Arts

553.8
RAT

DATA ENTERED
Date 25/06/08

# INTRODUCTION

The Government of Madras took up for consideration the question of publication of the various manuscripts in different languages on subjects like Philosophy, Medicine and Science, etc., early in May 1948. Important Manuscripts libraries in the Madras Presidency were requested to send a list of unpublished manuscripts with them for favour of being considered by the Government for publication. The Honorary Secretary of the Tanjore Maharaja Serfoji's Sarasvathi Mahal Library, Tanjore, alone complied with this request. This list as well as a similar list of unpublished manuscripts in the Government Oriental Manuscripts Library, Madras, were carefully examined and a tentative selection of manuscripts suitable for publication was made. The Government in their Memorandum No. 34913/41-10, Education, dated 4-4-49, constituted an Expert Committee with the Curator of the Government Oriental Manuscripts Library, Madras, as the Secretary, for the final selection of manuscripts suitable for printing and for estimating the cost of publication.

The following are the members of the Committee :—

1. Sri T. M. Narayanaswami Pilli, M.A., B.L.,
2. ,, R. P. Sethu Pillai, B.A., B.L.,
3. ,, C. M. Ramachadra Chettiar, B.A., B.L.,
4. ,, R. Krishnamoorthy, (Kalki).
5. Dr. N. Venkataramanayya, M.A., PH.D.,
6. Sri M. Ramanuja Rao Naidu, M.A.,
7. ,, V. Prabhakara Sastri.
8. ,, N. Venkata Rao, M.A.,
9. ,, H. Sesha Ayyangar.
10. ,, Masti Venkatesa Ayyangar, M.A.,
11. ,, M. Mariappa Bhat. M.A., L.T.,
12. Dr. C. Achyuta Menon, B.A., PH.D.,
13. ,, C. Kunhan Raja, M.A., D.PHIL.,
14. ,, A. Sankaran, M.A., PH.D., L.T.,
15. Sri P. S. Rama Sastri.
16. ,, S. K. Ramanatha Sastri.
17. Dr. M. Abdul Haq, M.A., D.PHIL., (OXON).
18. Afzul-ul-Ulama Hakim Khader Ahamed.
19. Sri P. D. Joshi.
20. ,, S. Gopalan, B.A., B.L.,
21. ,, T. Chandrasekharan, M.A., L.T.,

With the exception of Sri Masti Venkatesa Ayyangar, and Dr. C. Kunhan Raja, the above members continued to be members of the Expert Committee for 1950-1951 also to which the following gentlemen were included in Govt. Memo. No. 7297-E/50—3, Edn., D/-19-5-'50 and Govt. Memo. No. 15875-E/50-4, Edn., D/7-9-'50.

1. Dr. A. Chidambaranatha Chettiar, M.A., PH.D.,
2. Sri S. Govindarajulu, B.A., B.L., LL.B., Bar-at-law.
3. Capt. G. Srinivasamoorthy, B.A., B.L., M.B., AND C.M.,
4. Dr. Muhammad Hussain Nainar, M.A., PH.D.,
5. Sri T. V. Subba Rao, B.A., B.L.,
6. Principal, College of Indian Medicine, Madras.

The members of the Committe formed into Sub-Committees for the various languages, Sanskrit, Tamil, Telugu, Kannada, Malayalam, Mahrathi and Islamic Languages. They met during the month of May, 1949, at Madras and at Tanjore to examine the manuscripts and make a selection. The recommendations of the Committee were accepted by the Government and they decided to call these publications the "MADRAS GOVERNMENT ORIENTAL SERIES" and appointed the Curator, Government Oriental Manuscripts Library, Madras, as the General Editor of the publications.

The following manuscripts have been taken up for publication during 1949—50.

### "A" FROM THE GOVERNMENT ORIENTAL MANUSCRIPTS LIBRARY, MADRAS.

### TAMIL

1. Kappal Sāttiram.
2. Anubhava Vaidya Muṟai.
3. Āttānakōlāhalam.
4. Upadēs'a Kāṇḍam.
5. Cōḷan Pūrva Paṭṭayam.
6. Koṅga Dēs'a Rājākkaḷ.
7. Sivajñāna Dīpam.

### TELUGU

1. Auṣadha Yōgamulu.
2. Vaidya Nighaṇṭu.
3. Dhanurvidyā Vilāsamu.
4. Yōga Dars'ana Viṣayamu.
5. Khaḍga Lakṣaṇa S'irōmaṇi

## SANSKRIT

1. Viṣanārāyaṇīyam. (Tantrasārasaṅgraha)
2. Bhārgava Nāḍikā.
3. Hariharacaturaṅgam.
4. Brahmasūtravṛtti—Mitākṣarā.
5. Nyāyasiddhānta Tattvāmṛtam.

## MALAYALAM

1. Garbha Cikitsā.
2. (*a*) Vāstulakṣaṇam.
   (*b*) S'ilpaviṣayam.
3. Mahāsāram.
4. Kaṇakkusāram.
5. Kriyākramam.
6. Kaṇakkusāram - Bālaprabōdham.

## KANNADA

1. Lōkōpakāra.
2. Raṭṭamata.
3. As'vas'āstram.
4. Vividha Vaidya Viṣayagaḷu.
5. Saṅgītaratnākara.
6. Sūpas'āstra.

Indira Gandhi National Centre for the Arts

## ISLAMIC LANGUAGES

1. Jamil-Al-Ashya.
2. Tibb-E-Faridi.
3. Tahqiq-Al-Buhran.
4. Safinat-Al-Najat.

---

### "B" FROM THE TANJORE MAHARAJA SERFOJI'S SARASVATHI MAHAL LIBRARY, TANJORE.

## TAMIL

1. Sarabhēndravaidya Muṟai (Diabetics).
2. do (Eyes).
3. Agastiyar 200.
4. Koṅkaṇars'arakku Vaippu.
5. Tiruchiṟṟambalakkōvaiyār with Padavurai.

6. Kāalacakram
7. Tālasamudram
8. Bharatanāṭyam
9. *(a)* Pāṇḍikēli Vilāsam Nāṭakam
   *(b)* Pūrūrava Cakravarti Nāṭakam
   *(c)* Madana Sundara Vilāsa Nāṭakam
   *(d)* Percy Macqueen's Collection in the Madras University Library on Folklore.
10. Rāmaiyan Ammāṉai
11. Tamil Pāṭalkaḷ including Paṭṭiṉattār Veṇbā and Vaṇṇaṅkaḷ.

## TELUGU

1. Kāmandakanītisāramu
2. Tāḷadas'āprāṇapradīpikā
3. *(a)* Raghunātha Nāyaka Abhyudayamu
   *(b)* Rājagōpāla Vilāsamu
4. Rāmāyaṇamu by Kaṭṭa Varadarāju

## MAHRATHI

Indira Gandhi National Centre for the Arts

1. Nāṭyas'āstra Saṅgraha
2. *(a)* Book of Knowledge
   *(b)* Folk Songs.
   *(c)* Dārā Darun Vēṇi Paddhati
   *(d)* As'vāsa Catula Dumani
3. *(a)* Pratāpasimhendra Vijaya Prabandha
   *(b)* S'arabhēndra Tīrthāvaḷi
   *(c)* Lāvaṇi
4. Dēvēndra Kuravañji
5. Bhakta Vilāsa
6. S'lōka Baddha Rāmāyaṇa

## SANSKRIT

1. As'vas'āstra with Tricolour Illustrations
2. Rājamṛgāṅka
3. Cikitisāmṛtasāgara
4. Āyurvedamahodadhi
5. Gīta Govinda Abhinaya

6. *(a)* Coḷacampū
   *(b)* Sāhendra Vilāsa
7. Dharmākūtam - Sundara Kāṇḍa
8. Jātakasāra
9. Viṣṇutattvanirṇaya Vyākhyā
10. Saṅgīta Darpaṇa
11. Bījapallava

During 1950, only the Sub—Committees for TAMIL, TELUGU and KANNADA met in the month of July 1950 at Madras.

The following books were taken up for publication iu the various languages in 1950—51.

### TAMIL

1. Daṭcaṇāyanār-Vaiddiya-Aṭṭavaṇai.
2. Vaiddiyak Kalañciyam
3. Anubhavavaiddiyam. V. 3

### TELUGU

1. Saivācārasaṅgrahamu.
2. Anubhava Vaidyamu.
3. Abhinayadarpaṇamu.

Indira Gandhi National Centre for the Arts

### SANSKRIT

1. Ārogyacintāmaṇi
2. Tattvasāra with Ratnasāriṇī
3. Sūtrārthāmṛta Laharī.
4. Ratnadīpikā and Ratnas'āstra.

### MALAYALAM

1. As'vacikitsa.
2. Phalasārasamuccaya.

### KANNADA

1. Vaidya Sāra Saṅgraha.

It is hoped that the publication of most of the important manuscripts will be completed within the next four years.

Some of the manuscripts taken up for publication are represented by single copies in the Library and consequently the mistakes that are found in them could not be corrected by comparing them with other copies. The Editors have, however, tried their best to suggest correct readings. The wrong readings are given in round brackets and correct readings have been suggested in square brackets. When different readings are found, they have been given

in the foot-notes except in the case of a few books, in which the correct readings have been given in the foot-note or incorporated in the text itself.

The Government of Madras have to be thanked for financing the entire scheme of publication although there is a drive for economy in all the departments. My thanks are due to the members of the Expert Committee who spared no pains in selecting the manuscripts for publication. I have also to thank the various editors, who are experts in their own field, for readily consenting to edit the manuscripts and see them through the press. The various presses that have co-operated in printing the manuscripts in the best manner possible also deserve my thanks for the patience exhibited by them in carrying out the corrections made in the proofs.

This edition of Ratnadipika and Ratnasastram is based on two paper manuscripts preserved in the Government Oriental Manuscripts Library, Madras, and described under R. Nos. 4494 and 2942 respectively. The size of the manuscripts is 10 3/8 X 9½ inches Each contains 16 folios of 20 lines to a page and is in Devanagari character. Tne condition of these manuscripts is good. Ratnadipika was transcribed from a manuscript of Sri Harihararajaguru, Chochinajagannathapuram, Kudala post, Ganjam District, while the other was transcribed from a manuscript of the Raja of Chirakkal, Malabar District.

There are some omissions of letters and words here and there in both these works. Since these are single copies, the lacunae could not be supplied. In some places, suggestions have been given by the Editor. But even then, the omissions are too many. It is understood from the journal of Sri Venkatesvara Oriental Institute, Volume, X Part 2, on page 101 under manuscripts Notes that copies of Ratnasastram and Ratnadipika are available in that Institute. In spite of our request and reminders to the Director of the Institute, it was not possible to get them for collation. Some of the omissions in the printed book may perhaps be supplied in those manuscripts.

Reference is to be made to the good work done by Sri M. S. Vaidyanathan, Siromani, Pandit, Government Oriental Manuscripts Library, Madras, in seeing the work through the press.

Govt. Oriental MSS.
Library, Madras,
4—3—51.

T. CHANDRASEKHARAN,
*General Editor,*
*Madras Govt. Oriental Series.*

# भूमिका

मौक्तिक मरकत वज्र प्रवाल वैदूर्य नील माणिक्यम् ।
गोमेद् पद्म (पुष्प) रागौ भुवि नव रत्नानि भूतये भान्तु ॥

इदमिदानीं इदंप्रथमतया मुद्राप्य प्रकाश्यते "रत्नदीपिका" "रत्नशास्त्रम्" इति रत्नशास्त्ररत्नद्वयं क्रमेण श्रीचण्डेश्वर-बुद्धभटाभ्यां विनिर्मितम् ।

रत्नमिति चात्रत्यं पदं रमन्तेऽस्मिन् जना इत्यन्वर्थं 'रमु क्रीडायाम्' इति धातोः बाहुलकात् क्नपि तुकि च निष्पन्नं मणिपर्यायं, "रत्नं मणिर्द्वयोरश्मजातौ मुक्तादिकेऽपिच" इत्यमरसिंहवचनात् मरकताद्यश्मजातेर्मुक्तादेश्च वाचकम् ।

"रत्नं स्वजातिश्रेष्ठेऽपि" इति तदीयवचनात् स्वजातिश्रेष्ठवाचि च रत्नपदमन्यत् । यदनुरुध्य "कन्यारत्न" मित्यादिः प्रयोगः ।

रत्नानि च प्राधान्येन नव परिगणितानि प्राचीनैः—

"मुक्ता माणिक्य वैदूर्य गोमेदा वज्रविद्रुमौ ।
पद्मरागो मरकतं नीलश्चेति यथाक्रमात् ॥" इति तन्त्रसारे,

"वज्रं गारुत्मतं पद्मरागो माणिक्यमेव च ।
इन्द्रनीलश्च गोमेदस्तथा वैदूर्यमित्यपि ॥
मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव ॥"—इति भावप्रकाशे,

अन्यत्र च । मरकतमेव गारुत्मतमिति व्यपदिश्यते ।

माणिक्यं तरणेस्सुजातममलं मुक्ताफलं शीतगोः
माहेयस्य च विद्रुमं मरकतं सौम्यस्य गारुत्मतम् ।
देवेज्यस्य च पुष्परागमसुरामात्यस्य वज्रं शनेः
नीलं निर्मलमन्ययोश्च गदिते गोमेदवैदूर्यके ॥

इति जातकाभरणे च नवग्रहाणां नवरत्नानि निरूपितानि ।

रत्नशास्त्रप्रणेतारश्च बहवः प्राचीनाः । तदीयाश्च रत्नशास्त्रग्रन्था असंख्येयाः । तदेतत् अस्यां रत्नदीपिकायां—"व्यासागस्त्यवराहादिमुनयो रत्नसागरे निर्मथ्य

ज्ञानशैलेन नवरत्नसुधामदुः ॥" "इत्येवं नव कीर्तितानि मुनिभिः रत्नानि सर्वग्रह-प्रीत्यै व्यासवराहनारदमुखैस्सर्वज्ञभावं गतैः ।" "रत्नसारेऽप्युदाहृतम् ।" "रत्नशास्त्र उदाहृतम् ।" "अनेनैव क्रमेणाह परीक्षाकार एव नः ।" "प्रोक्तं रत्नशास्त्रविशारदैः ।" "कथ्यन्ते रत्नशास्त्रज्ञैः ।" "शस्यन्ते रत्नशास्त्रविशारदैः ।" "मूल्यञ्चाष्टविधं प्राह मौक्तिकस्य धनेश्वरः ।" "छायां चैषां प्रवक्ष्यामि यथाप्युक्ता पुरातनैः ।" "बुधैरेवं प्रकीर्तिता" "यथा जीवितरत्नसारे (रत्नाकरे)" इत्यादिभिर्वचनैः, अस्मिन् बुद्धभटीये रत्नशास्त्रे—"मूर्तित्रयाय भुवनत्रयवन्दिताय कृत्वा नमस्समवलोक्य च रत्नशास्त्रम् ।" "मणिशास्त्रविदो विदन्ति" "वदन्ति तज्ज्ञाः" "प्रकीर्तिता रत्नविनिश्चयज्ञैः" "परिभावितमेतदत्र सद्भिः" "मणिविद्भिरुक्ताः" "इहाहुरार्यलोकाः" "इत्याहुर्वरणं रत्नकोविदाः" "इति रत्नविदां मनोवृत्तिः" "समासोक्तिः मणिशास्त्राणां महताम्" इत्यादिभिश्च वचनैस्स्फुटं प्रतीयते ।

तत्र रत्नदीपिकायां रत्नशास्त्रप्रणेतृत्वेन निर्दिष्टस्य भगवतोऽगस्त्यमहर्षेः वचनमनूदितं श्रीमल्लिनाथेन "शिशुपालवध"—टीकायां (१-१६, ४-४४,) "सिंहलस्याकरोद्भूता महानीलास्तु ते स्मृताः" इति भगवानगस्त्यः" इति । "नीलीरसनिभाः केचित् शम्भुकण्ठनिभाः परे" इत्यादिना अगस्त्येन रत्नशास्त्रे एषां एकादशविधच्छायाभिधानात्" इति च ।

कुमारसम्भवव्याख्याने विवरणाभिधाने अनन्तशयनमुद्रिते च (१-५) अगस्त्यवचनमनूदितम्—"मौक्तिकानामुत्पत्तिः गजेन्द्रेभ्योऽप्यस्तीत्युक्तमगस्त्येन—

"द्विपेन्द्रजीमूतवराहशङ्खमत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके तेषां तु शुक्त्युद्भवमेव भूरि ॥" इति ।

इदं च वचनं मल्लिनाथटीकायामपि तत्रैवानूदितम् । इदं पद्यञ्च अत्रापि बुद्धभटीये रत्नशास्त्रे मौक्तिकपरीक्षोपक्रमे दृश्यते । परन्तु मणिशास्त्रसंग्रहप्रवृत्तेन बुद्धभटेन अगस्त्यप्रणीतमेव तद्वचनं संगृहीतमित्यभ्यूहितुं शक्यते ॥

कुमारसम्भवविवरणे (१-२३) "यदाह भोजः—

"अस्ति शैलो विदूराख्यः पर्यन्ते तत्र काचन ।
मही रत्नाकरीभूता वैदूर्यं तत्र जायते ॥

मेघशब्देन जायन्ते तत्र रत्ननवाङ्कुराः ।

क्रमात् परिणतास्ते स्युर्मणयो राजपूजिताः ॥" इति ।

इति कीर्तनात् भोजोऽपि रत्नशास्त्रकृदिति ज्ञायते ॥

भोजोक्तवैदूर्यरत्नोत्पत्तिमभिप्रेत्यैव —

" तया दुहित्रा सुतरां सवित्री

स्फुरत्प्रभामण्डलया चकाशे ।

विदूरभूमिर्नवमेघशब्दात्

उद्भिन्नया रत्नशलाकयेव ॥"

(कुमारसम्भवे—(१–२३) इति महाकविः कालिदासः, तथा—

" अनेन राज्ञार्थिषु दुर्भगीकृतः

भवन्घनध्वानजरत्नमेदुरः ।

तथा विदूराद्रिरदूरतां गमी

यथा स गामी तव केलिशैलताम् ॥"

(नैषधीये १२–५५) इति महाकविः श्रीहर्षोऽपि, वर्णयाम्बभूवतुः ।

महाकाविः श्रीमाघोऽपि इममेवाभिप्रायं—

" उरगेन्द्रमूर्धरुहरत्नसंनिधेः

मुहुरुन्नतस्य रसितैः पयोमुचः ।

अभवन्यदङ्गणभुवः समुच्छ्वस-

न्नववालवायजमणिस्थलाङ्कुराः ॥"

(शिशुपालवधे—१३–५८) इत्यत्राविष्करोति ।

परन्तु तत्र नागरत्नसंनिधिरपि वैदूर्यरत्नाङ्कुरोद्भेदे कारणमित्युपवर्णितम् । तत्र च मल्लिनाथटीका —" वैदूर्यं वालवायजम् " इत्यमरः (कोशः) । वालवायो नाम वैदूर्यप्रभवो देशविशेषः । उरगेन्द्रमूर्धन्यरत्नाङ्कुरैस्सहोदितमेघध्वनेः विदूरभूमिरुद्भिन्नाङ्कुरा भवतीति प्रसिद्धिः । तदुक्तम्—" उरगमूर्धन्यरत्नसन्निधानाद-कालेऽपि मेघा गर्जन्तीति वार्ता " । केचित्तु यत्रैवोरगरत्नं मेघरसितं च तत्रैव वैदूर्यभूमिः " । इति ।

कुमारसम्भवटीकायाञ्च (१-२३) मल्लिनाथः ।—"विदूरस्य अद्रेः प्रान्तभूमिः विदूरभूमिः । "अविदूरे विदूरस्य गिरेरुत्तुङ्गरोधसः । काकतालीयसीमान्ते मणीनामाकरो भवेत् ॥" इति बुद्धः" इति प्रकृतबुद्धभटीयरत्नशास्त्रे वैदूर्य-परीक्षान्तर्गतं द्वितीयश्लोकमनूद्य तत्कर्तारं बुद्धभटञ्च नाम्नैव स्मरति । बुद्धभटीयेपि वैदूर्यपरीक्षायां चतुर्थपद्ये वैदूर्यरत्नानां पयोधररवात् वसुधां विभिद्य जायमानत्वं निरूपितम् ।

वज्र-पद्मराग-मरकत-स्फटिक-मौक्तिक-विद्रुम-महानील-माणिक्य वैदूर्यादीनां नाना-विधानां रत्नानां उल्लेखो रघुवंश कुमारसम्भव-किरातार्जुनीय शिशुपालवध-नैषधीयचरितादिषु महाकाव्येषु, अन्यत्र च बहुत्र, दृश्यते । तेन रत्नशास्त्राणां बहूनां प्रचुरः प्रचारः पूर्वस्मिन् काले समभूदिति स्फुटं प्रतीयते ॥

प्रकृते च ग्रन्थद्वये नवरत्नेषु महारत्नोपरत्नविभागः, रत्नानामाकरभूमिभेदः, शुक्लादिवर्णभेदः, नवरत्नानामवान्तरभेदः, स्त्रीपुन्नपुंसकविभागः, विप्रादिजातिभेदः, उपादेयो गुणः, त्याज्यो दोषः, उत्तममध्यमाधमविभागः, तत्तद्युक्तो मूल्यभेदः, रत्नशोधन-प्रकारः, कृत्रिमाकृत्रिमत्वनिर्णयोपायः, श्लाघ्यरत्नधारणे आयुरभिवृद्ध्यादिफलभेदः, दोषशान्तिः, नवग्रहप्रीतिः, इत्येतादृशाः बहवो विषयास्संग्रहेण निरूपिताः ॥

ग्रन्थकृन्नाम च "चण्डेश्वरः" इति "बुद्धभटः" इति च निर्दिष्टं ग्रन्थ एव । परन्तु ग्रन्थकृद्देशकालादिकं स्फुटं न ज्ञायते । मल्लिनाथेन अनूदितत्वात् बुद्धभटस्ततः प्राचीन इति तु निर्णीयते । "अनेनैव क्रमेणाह परीक्षाकार एव नः" इति रत्नदीपि-कायामुक्तेः, यदि परीक्षाकारः बुद्धभटः, तदा स प्राचीनः, चण्डेश्वरस्ततोऽर्वाचीन इत्यभ्यूह्यते ॥

ग्रन्थद्वये चास्मिन् तत्र तत्र बह्वी अशुद्धिः, अक्षरपातः, ग्रन्थपातश्च लेखकप्रमादेन समीचीनकोशदौर्लभ्येन च संवृत्ताः अनायत्या क्षन्तव्याः । समीचीनकोशान्वेषणपूर्वकं पुनर्मुद्रापणेन परिहरणीयाश्चेति, रत्नशास्त्रसंबन्धीनि च अन्यान्यपि अमुद्रितानि ग्रन्थरत्नानि अन्विष्य प्रचारणीयानीति च, सविनयं विज्ञाप्य इयता उपसंह्रियते ॥

इत्थम्

पोल्कग्रामाभिजनः

मद्रपुरीसंस्कृतकलाशाला साहित्य वेदान्तोपाध्यायः

"शास्त्ररत्नाकर" बिरुदभूषितः

**पि-एस्. श्रीरामशास्त्री ॥**

———

## ॥ रत्नदीपिकाया विषयानुक्रमणी ॥


| विषयः | पृष्ठसङ्ख्या |
|---|---|
| **प्रथमं ज्योतिः** | |
| मङ्गलाचरणम् | १ |
| ग्रन्थकर्तृनामनिर्देशः | ,, |
| ग्रन्थस्य नामनिर्देशः | ,, |
| रत्नानां महारत्नोपरत्नभेदेन विभागवर्णनम् | ,, |
| रत्नानां नामनिर्देशः | ,, |
| रत्नानां वर्णकथनम् | १—२ |
| वज्रपरीक्षा | २ |
| वज्रस्योत्पत्तिकथनम् | २ |
| वज्रजातिकथनम् | ,, |
| स्त्रीपुंनपुंसकभेदेन वज्रजातिकथनम् | २ |
| वज्रस्य चतुर्धा विभागः | ,, |
| नानावज्राणां धारणे निमित्तकथनम् | ,, |
| वज्रस्य धारणे गुणः | २—३ |
| नानावज्राणां वर्णकथनम् | ३ |
| वज्रस्य गृहस्थितौ फलकथनम् | ३ |
| वज्रस्य करधारणे फलकथनम् | ३ |
| वज्रस्य गुणदोषकथनम् | ३ |
| जातिभेदेन नानावज्रधारणनियमकथनम् | ३ |
| वज्रमूल्यनिरूपणम् | ४ |
| जातिभेदेन मूल्यभेदः | ४ |
| कृत्रिमवज्रनिरूपणम् | ४ |
| वज्रपरीक्षाप्रकारः | ५—६ |
| वज्रस्य पञ्चविधदोषकथनम् | ६ |
| दुष्टस्य वज्रस्य धारणे फलकथनम् | ६ |
| वज्रे चतुर्विधरेखाणां सत्त्वकथनम् | ६ |
| अशोधितवज्रधारणे दोषाः | ७ |
| **द्वितीयं ज्योतिः** | |
| मुक्तापरीक्षा | ७ |
| मौक्तिकानामष्टविधत्वनिरूपणम् | ,, |
| मौक्तिकानामुत्पत्तिस्थानकथनम् | ,, |
| अष्टविधानां मौक्तिकानां वर्णादिकथनम् | ,, |
| मौक्तिकानां षड्विधगुणवत्त्वकथनम् | ८ |
| मुक्ताच्छायानिरूपणम् | ,, |
| मौक्तिकानां दोषनिरूपणम् | ,, |
| मौक्तिकानां गुणनिरूपणम्- | ,, |
| मौक्तिकानां मूल्यकथनम् | ८—९ |
| मौक्तिकानां विप्रादिभेदेन चतुर्विधकथनम् | ,, |
| मौक्तिकपरीक्षाप्रकारः | ,, |
| मौक्तिकसामान्यस्य फलकथनम् | ,, |
| **तृतीयं ज्योतिः** | |
| माणिक्यपरीक्षा | १० |
| माणिक्यस्योत्पत्तिभूमिवर्णनम् | ,, |
| माणिक्यस्य जातिभेदचतुष्टयकथनम् | ,, |
| माणिक्यस्य स्वरूपकथनम् | ,, |
| माणिक्यस्य वर्णकथनम् | ,, |
| माणिक्यमूल्यनिरूपणम् | १०—११ |


Indira Gandhi National Centre for the Arts

| विषयः | पृष्ठसङ्ख्या |
|---|---|
| माणिक्यपरीक्षाप्रकारः | १०—११ |
| माणिक्यस्य वर्णानुसारेण फलकथनम् | १२ |

**चतुर्थं ज्योतिः**

| | |
|---|---|
| नीलपरीक्षा | १२ |
| नीलोत्पत्तिप्रकारकथनम् | ,, |
| ब्राह्मणादिक्रमेण नीलस्य वर्णकथनम् | ,, |
| नीलस्याकारभेदेन वर्णभेदकथनम् | ,, |
| नीलस्य दोषनिरूपणम् | ,, |
| नीलस्य गुणाः | १३ |
| नीलस्य मूल्यनिरूपणम् | ,, |
| पद्मरागेन्द्रनीलयोर्मूल्य-साम्यवर्णनम् | ,, |
| इन्द्रनीललक्षणम् | ,, |

**पञ्चमं ज्योतिः**

| | |
|---|---|
| मरकतपरीक्षा | १४ |
| मरकतस्य षड्गुणवत्त्वनिरूपणम् | १४ |
| मरकतस्य पञ्चदोषकथनम् | १४ |
| मरकतस्य जातिचतुष्टयनिरूपणम् | ,, |
| चतुर्विधानमपि मरकतानां-वर्णभेदकथनम् | ,, |
| मरकतलक्षणम् | ,, |
| मरकतोत्पत्तिभूमिवर्णनम् | ,, |
| मरकतस्य बहुविधकान्तिमत्त्वकथनम् | ,, |
| विभिन्नानां मरकतानां फलभेदकथनम् | ,, |
| पुनर्मरकतस्य सप्तदोषवत्त्वनि-रूपणम् | १५ |

| विषयः | पृष्ठसङ्ख्या |
|---|---|
| मरकतस्य गुणपञ्चकवर्णनम् | १५ |
| मरकतस्याष्टविधच्छायाकथनम् | ,, |
| गारुडमणिविक्रयः | ,, |
| मरकतस्य मूल्यभेदवर्णनम् | १६ |
| दुष्टस्य मरकतस्य-फलनिरूपणम् | १६—१७ |
| मरकतपरीक्षा | ,, |
| सहजकृत्रिममरकतयोः विमर्शप्रकारः | १७ |

**षष्ठं ज्योतिः**

| | |
|---|---|
| गोमेदकपरीक्षा | १७ |
| गोमेदकलक्षणम् | ,, |
| गोमेदकस्य चतुर्विधजातिनिरूपणम् | ,, |
| गोमेदकगुणाः | १८ |
| गोमेदकमूल्यम् | ,, |
| प्रवालगोमेदकयोर्मूल्ये साम्यवर्णनम् | ,, |

**सप्तमं ज्योतिः**

| | |
|---|---|
| स्फटिकपरीक्षा | १८ |
| स्फटिकदोषाः | ,, |
| भस्माङ्कमणिलक्षणम् | ,, |
| गारुडमणिलक्षणम् | १९ |
| तार्क्ष्यमणिलक्षणं, तद्गुणाश्च | ,, |
| आस्तिकमणिलक्षणम्, तद्गुणाश्च | ,, |
| सुवर्णरेखामणिलक्षणम्, तद्गुणाश्च | ,, |

**अष्टमं ज्योतिः**

| | |
|---|---|
| वैदूर्यपरीक्षा | २० |
| वैदूर्यस्य गुणाः | ,, |


Indira Gandhi National Centre for the Arts

| विषयः | पुटसङ्ख्या |
|---|---|
| पुष्यरागपरीक्षा | २० |
| पुष्यरागगुणाः | ,, |
| पुष्यरागदोषाः | ,, |
| उपरत्नलक्षणकथनम् | ,, |
| **नवमं ज्योतिः** | |
| प्रवालपरीक्षा | २१ |
| प्रवाललक्षणम् | ,, |
| प्रवालस्य गुणाः | ,, |
| प्रवालस्य दोषाः | ,, |
| निर्दुष्टस्य विषादिवज्रस्य-फलकथनम् | २१ |
| दुष्टस्य वज्रस्य फलकथनम् | २२ |
| दुष्टस्य विद्रुमस्य फलकथनम् | ,, |
| दुष्टस्य माणिक्यस्य फलकथनम् | ,, |
| गरुडमणिगुणदोषकथयम् | ,, |
| गोमेदकस्य गुणदोषकथनम् | ,, |
| पुष्यरागवैदूर्ययोः फलकथनम् | २३ |
| विद्रुमस्य फलकथनम् | २३ |
| नवरत्नाभरणस्य धार्यत्वकथनम् | ,, |
| नवग्रहाणां नवरत्नकथनम् | ,, |


॥ इति चण्डेश्वरकृतरत्नदीपिकाया विषयानुक्रमणी समाप्ता ॥

Indira Gandhi National Centre for the Arts

---

## ॥ बुद्धभटीयरत्नशास्त्रस्य विषयानुक्रमणी ॥


| विषयः | पुटसङ्ख्या |
|---|---|
| मङ्गलाचरणम् | २४ |
| वस्तुनिर्देशः | ,, |
| बलनामकदानवेन्द्रवर्णनम् | ,, |
| बलेः पश्चात्मतासम्भूतिः | ,, |
| बलेरवयवानां रत्नबीजत्वकथनम् | ,, |
| देवादिभिः रत्नबीजं गृहीत्वा गमनम् | ,, |
| वेगेन संपततां देवादीनां हस्तात् रत्नबीजानां समुद्रादिषु पतनवर्णनम् | २५ |
| ततस्स्थानेभ्यो रत्नानां प्रादुर्भावः | ,, |
| परीक्षितानामेव रत्नानां धार्यत्वकथनम् | २५ |
| वज्रपरीक्षा | ,, |
| दानवास्थिलेशस्य वज्रात्मना परिणामकथनम् | ,, |
| हैमाद्यष्टविधाकरेषु वज्रोत्पत्तिकथनम् | ,, |
| अष्टानामपि वज्राणां वर्णकथनम् | २६ |
| सद्वज्रप्रशंसा | ,, |
| वर्णानुसारेण वज्रधारणे नियमः | ,, |
| राजधार्यवज्रनिरूपणम् | ,, |
| वज्रस्य धारणादौ अवधेयविषयाः | २७ |
| वज्रधारणे गुणाः | २८ |
| वज्रमूल्यनिरूपणम् | २९ |
| नारीणां वज्रमधार्यमिति निरूपणम् | ,, |
| कृत्रिमवज्रस्य संभवप्रकारः | ,, |
| वज्रस्य परीक्षाप्रकारः | ,, |

| विषयः | पुटसङ्ख्या |
|---|---|
| मौक्तिकपरीक्षा | ३० |
| मौक्तिकोत्पत्तिभूवर्णनम् | ,, |
| मौक्तिकानां तारतम्यविचारः | ३०—३१ |
| मौक्तिकानामष्टविधाकरनिरूपणम् | ,, |
| मुक्ताफलस्य गृहस्थितिमात्रेण विशेषफलदायकत्वकथनम् | ३२ |
| मौक्तिकप्रशंसा | ३२—३३ |
| महासुरदन्तावलेर्मुक्ताबीजत्वकथनम् | ,, |
| सिंहलादिदेशभेदात् मौक्तिकस्याष्टविधत्वनिरूपणम् | ३४ |
| अष्टानामपि मौक्तिकानां वर्णादिकथनम् | ,, |
| वेणुजादिभेदेन मौक्तिकप्रभेदकथनम् | ,, |
| मुक्तामणिमूल्यनिरूपणम् | ३५—३६,३७ |
| मौक्तिकपरीक्षाप्रकारः | ३७ |
| पद्मरागपरीक्षा | ३८ |
| दानवेन्द्रस्यासृक् गृहीत्वा दिवाकरस्याकाशमार्गेण गमनवर्णनम् | ,, |
| सूर्यस्य मध्येमार्गं रावणेन निरोधवर्णनम् | ,, |
| सिंहलदेशीयसरिति सूर्येणासृजो मोक्षवर्णनम् | ,, |
| रावणगङ्गावर्णनम् | ,, |
| तत्रासृजः पद्मरागत्वेनोत्पत्तिवर्णनम् | ,, |


Indira Gandhi National Centre for the Arts

| विषयः | पुटसङ्ख्या |
|---|---|
| नानाविधवर्णयुतानां पद्मरागाणामुत्पत्तिवर्णनम् | ३९ |
| रावणगङ्गायाः पद्मरागोत्पत्तिकथनम् | ४० |
| देशभेदेन भिन्नानां पद्मरागाणां मूल्यविवरणम् | ४० |
| दोषोपसृष्टपद्मरागधारणे दोषः | ४१ |
| पद्मरागपरीक्षा | ४२ |
| विजातिधारणे दोषाः | ,, |
| मरकतपरीक्षा | ४३ |
| मरकतोत्पत्तिकथनम् | ,, |
| मरकतगुणवर्णनम् | ४४ |
| मरतकस्य विषनाशकत्ववर्णनम् | ,, |
| विगुणमरकतनिरूपणम् | ४५ |
| मरकतस्य धारणे गुणाः | ,, |
| मरकतमूल्यवर्णनम् | ,, |
| मरतकलक्षणम् | ४६ |
| इन्द्रनीलपरीक्षा | ,, |
| इन्द्रनीलोत्पत्तिः | ४० |
| इन्द्रनीलधारणे गुणाः | ४७ |
| पद्मरागेन्द्रनीलयोर्धारणादौ साम्यवर्णनम् | ४८ |
| महानीलवर्णनम् | ,, |

| विषयः | पुटसङ्ख्या |
|---|---|
| मणीनां वर्णभेदेन नामभेदवर्णनम् | ,, |
| इन्द्रनीलपद्मरागयोर्मूल्ये साम्यवर्णनम् | ,, |
| इन्द्रनीलमहानीलपुष्यरागकोरण्डककाषायकसोमालकमणीनां वर्णनम् | ,, |
| वैदूर्यपरीक्षा | ४९ |
| वैदूर्योत्पत्तिवर्णनम् | ,, |
| विजातिवैदूर्यवर्णनम् | ,, |
| वैदूर्यमूल्यवर्णनम् | ५० |
| कर्केतनोत्पत्तिवर्णनम् | ,, |
| कर्केतनमूल्यवर्णनम् | ,, |
| कर्केतनगुणानां वर्णनम् | ,, |
| पुलकपरीक्षा | ५१ |
| पुलकोत्पत्तिवर्णनम् | ५१—५२ |
| स्फटिकपरीक्षा | ५३ |
| स्फटिकप्रभेदवर्णनम् | ,, |
| स्फटिकमूल्यवर्णनम् | ,, |
| विद्रुमपरीक्षा | ,, |
| विद्रुमोत्पत्तिवर्णनम् | ,, |
| विद्रुममूल्यवर्णनम् | ,, |
| विद्रुमगुणवर्णनम् | ,, |
| विषयोपसंहारः | ,, |


|| इति बुद्धभटीयरत्नशास्त्रविषयानुक्रमणी समाप्ता ||

श्री चण्डेश्वरकृता

# ॥ रत्नदीपिका ॥

## —प्रथमं ज्योतिः—

भक्तेभ्यो भुवनाधिपत्यवरदं देवैर्महेन्द्रादिभिः
सिद्धैश्चारणगुह्यकैर्मुनिगणैः प्रोदि[दृष्ट]ष्टपादाम्बुजम् ।
संसारभ्रमभीरुणा च मनसा ध्यायन्ति यं योगिनः
तं वन्दे शशिखण्डमण्डितजटाजूटं भवं धूर्जटिम् ॥ 1

....तु य....पुरीष....दत्वा (?) [अभीष्टपुरुषार्थत्वात्] रत्नधेनुदिदृक्षया ।
चक्रे **चण्डेश्वरः** श्रीमान् विचित्रां **रत्नदीपिकाम्** ॥ 2

नवरत्नेषु धातूनामुत्पत्तिगुणजातिभिः ।
गुणो निरीक्ष्यते तेषु शोधनं चात्र कथ्यते ॥ 3

**तत्रादौ रत्नानां गुणानाह—**

व्यासागस्त्यवराहादिमुनयो रत्नसागरे ।
निर्मथ्य ज्ञानशैलेन नवरत्नसुधा[मदुः] ॥ 4

तत्र रत्नानि महारत्नोपरत्नभेदेन वि(द्वि)विधप्रकाराणि भवन्ति । तत्र, पञ्च रत्नानि मुख्यानि, (तोप) [नोप] रत्नचतुष्टयम् ।

लिख्यते चात्र सम्भिद्य यथामूल्यं यथागुणम् ।
वज्रं च मौक्तिकं चैव माणिक्यं नीलमेव च ॥ 5

मरकतं चैव विज्ञेयं महारत्नानि पञ्चधा ।
उपरत्नानि चत्वारि कथयामि शृणुष्व तत् ॥ 6

गोमेदं पुष्परागं च वैडूर्यं च प्रवालकम् ।
वज्रं च मौक्तिकं श्वेतं माणिक्यं रोहितं विदुः ॥ 7

नीलं नीलं समाख्यातं मरकतं हरितं विदुः ।
श्वेतं पीतं च गोमेदं पुष्परागं च पिञ्जरम् ॥
प्रवालं लोहितं प्रोक्तं वैडूर्यं पाण्डुरं हरित् । 8

**तत्र वज्रपरीक्षा—**

सिंहले च कलिङ्गे च मातङ्गे च हिमालये ।
पारस्करे च सौराष्ट्रे वज्र(चरति)[स्योत्पत्ति] भूमयः ॥ 9

श्वेतरक्तपीतकृष्णादिवज्रजातयः ।
(त्र) [स्त्री] पुंनपुंसकं चेति लक्षणेन तु लक्षये ।
घृतान्यजलसंपूर्णा[:]ते भवन्ति बृहत्तरा(म्) [:] ॥ 10

पुरुषास्ते समाख्याताः रेखाबिन्दुविवर्जिताः ।
रेखाबिन्दुसमायुक्ताः षट्कोणास्ते[स्त्रियो म] ताः ॥ 11

त्रिकोणास्तनवोऽदीर्घाः विज्ञेयास्ते नपुंसकाः ।
सर्वेषां पुरुषाः श्रेष्ठाः तेऽधिकारसबन्धकाः ॥ 12

Indira Gandhi National Centre for the Arts

(त्रि)[स्त्री] वज्रं देहशुद्ध्यर्थं क्लीबसङ्ख्या नपुंसके ।
विप्रो रसायने प्रोक्तः क्षत्रियो रोगनाश(के)[ने] ॥ 13

गदादौ वैश्यजातीयः वीर्यस्तम्भे तुरीयकः ।
स्त्री तु स्त्रीणां प्रदातव्या क्लीबं क्लीबे तथैव च ॥ 14

सर्वेषां सर्वदा योज्याः पुरुषा (वि)[ब]लवत्तराः ।
(जेपुर्जितानि)[ये पुंजातीनि) रत्नानि स्वाङ्ग[कुर्वन्ति] मानवाः ॥ 15

पुत्रदारधनं तेषां भवेन्नित्योत्सवं गृहे ।
तुङ्गवज्रं प्रशंसन्ति षट्कोणालघुभास्करम् ॥ 16

सुतीक्ष्णाधारमष्टा[स्त्र)[श्र] सर्वतोरश्मिचिक्कणम् ।
षट्कोणमष्टपार्ष्णी च धारा द्वादश भा[स्करै)[रकैः] ॥ 17

उत्तमं मध्यमं तीक्ष्णमित्याकारभवा गुणाः ।
विद्यादिन्द्रध (नूदिष्ट) नुदीप्त स्वच्छाया श्रेय[शुभ्र]मेव च ॥ 18

लघुता वारितरणे दृढाघातसहिष्णुता ।
चिरावस्थानजं शौचं वज्रे व........का गुणाः ॥ 19

**अथ भेदमाह—**

स्तस्मि....स्वष्टाकप्रभव (?) शशिकला(ल)[स]ङ्काशवर्णो द्विज-?
श्वारक्तद्युतिमत्प्रियङ्गुकुसुमच्छायस्तथा क्षत्रियः ।
वैश्यः श्वेतनिशाप्रसूनसदृशः शीतांशुदीप्तिर्भवेत् ?
शूद्रः कृष्णरुचिस्तथाऽपि शिव[द]स्तेषां चतुर्णां क्रमात् ॥ 20

शक्रचापसम[बो][ज्यो]तिरि[न्दो][न्दु] कान्तिसमप्रभः (?) ।
प्रभिन्नरविरश्मिरं [श्मिश्च]ष्यकं चाश्रयलेखनम्(?) ॥ 21

अकालमृत्युसर्पाग्निसर्वव्याधिभयानि च ।
तथाऽशुभानि नश्यन्ति वज्रं यस्य गृहे स्थितम् ॥ 22

ऊर्ध्वे निवारयेद्वज्रं वने सिंहांश्च वारयेत् ।
रात्रौ निवारयेद्भूतान् नरो हि करधारणात् ॥ 23

षट्कोणं शुद्धतीक्ष्णाग्रं सर्वदोषैर्विवर्जितम् ।
ती(क्ष्णा) क्ष्णधारं च यद्वज्रं लक्षमूल्यन्तु तद्भवेत् ॥ 24

जलबिन्दुयवरेखा वैश्यानां काकपादवत् ।
एते दोषाः परित्याज्या नानादृश्यफलप्रदाः ॥ 25

तद्वज्रं तुलयाऽऽयोज्य पश्चान्मूल्यं विनिर्दिशेत् ।
ब्राह्मणानां हितं श्वेतं पीताभं भूभुजां हितम् ॥ 26

आरक्ताभं तु वैश्यानां शूद्राणाम(शि)[सि] तं हितम् ।
अष्टाभिः सितसिद्धार्थैः यवतण्डुलमुच्यते ॥ 27

तस्य पिण्डा[नु] सारेण वज्रमूल्यं विनिर्दिशेत् ।
पात्रेण यवमात्रेण दुरूहं तण्डुलेन तु ॥ 28

निर्दोषं यवमात्रं च कान्तिः सर्वत्र दृष्यते ।
मूल्यं पञ्चशतं तस्य रत्नसारेऽप्युदाहृतम् ॥ 29

पिण्डं च द्विगुणं.... [मू ]ल्ये वज्र....व तथा भवेत् ।
चतुर्गुण भवेन्मूल्यं त्रिगुणोऽष्टगुणं मतम् ॥ 30

चतुःपञ्चषडादीनां क्रमवृद्धिर्भवेद्यदि ।
तन्मूल्यं द्विगुणं चैव रत्नशास्त्र उदाहृतम् ॥ 31

गुरुत्वे चाघ(ना)[मं] मूल्यं सामान्ये मध्यमं स्मृतम् ।
लाघवे (उ)[तू ] त्तमं मूल्यमुत्तमाधममध्यमाः ॥ 32

मनसा भावयेत्पिण्डं पश्चान्मूल्यं विनिर्दिशेत् ।
श्वेतपीतं च रक्ताभं कृष्णं वा कुलिशं भवेत् ॥ 33

Indira Gandhi National
Centre for the Arts

ब्राह्मणादिक्रमेणैव जातिभेदं प्रकल्पयेत् ।
उत्तमं ब्राह्मणे मूल्यं मध्यमं क्षत्रिये श्रुतम् ॥ 34

सामान्यं वैश्यजातीये शूद्रजन्मनि चाधमम् ।
यन्मूल्यं ब्राह्मणे प्रोक्तं पादाधः क्षत्रिये भवेत् ॥ 35

अनेनैव क्रमेणाह परीक्षाकार एव नः ।
कृत्रिमत्वं य[वा][दा] वज्रे शक्यते सूरिभिः क्वचित् ॥ 36

क्षाराम्लैर्लेपयेद्वज्रं रौद्रे चैव परिक्षिपेत् ।
कृत्रिमजातिवैवर्ण्यं सह पश्चा(तिदि)[त्तुद]श्यते ॥ 37

क्षीयते चातिसङ्घर्षात्त(च्चू )[त्तू]र्णं याति चूर्णताम् ।
यत्तु वारितरं नाम दूर्वादलसमच्छवि ॥ 38

चूर्णमायतनं यत्र तद्रत्नं कोटिभाजनम् (?) ।
माहेन्द्रोऽयं मणिर्धार्यो धनधान्यसमृद्धिदः ॥ 39

पुत्रदं पावनं पूज्यं शत्रुघ्नं बलपुष्टिदम् ।

## अथ जीवितरत्नसारेण उच्यते—

पुत्रदं पावनं पूज्यं शत्रुघ्नं समरेऽभयम् ॥ 40

... ग.........निधातव्यस्तवलाभरयमणिम् (?) ।
उदरे वज्रसंयोगात् गर्भस्तु शिव लीयते (?) ॥ 41

शूद्राणामपि धर्तव्यः स्रीवक्षद्रक्षते मणिः (?) ।
जठरे गर्भसंसर्गात् स्त्रे तदासा वलीयते (?) ॥ 42

यदि धारयते पश्चादज्ञाना....स्तु वर्जितः ।
तथैव वज्रं शिरसि वज्र एनाशनि (?) ॥ 43

Indira Gandhi National
Centre for the Arts

अधमस्योत्तमं तुल्यं उत्तमस्याधमं तथा ।
मध्यमो हि भयात्कुर्यात् सर्वकृष्टं भयोन्मुखे (?) ॥ 44

## अथ रत्नानां परीक्षामाह—

वज्राणि चि(ह्न)[त्र] भूतानि वृथा कुर्वन्ति चाधमाः ।
परीक्षयेत शास्त्रज्ञैः (सासद्ध) शाणघर्षणलेखनैः ॥ 45

लोहानि यानि रत्नानि सर्वरत्नानि यानि च ।
तानि वज्रेण लेख्यानि तैर्वज्रं च न लिख्यते ॥ 46

रसायने भवेद्विप्रः शुभसिध्द्यर्थदायकः ।
क्षत्रियो मृत्युजिद्रक्तो वलीपलितरो(म) [ग] हा ॥ 47

भद्रकारी भवेद्वैश्यः पीतदेहो ह्यरोगकृत् ।
कृष्णः शूद्रो रुजं हन्ति वीर्यस्त(म्भ)[म्भं] करो(हि)[ति] च ॥ 48

स्त्रीपुंनपुंसका ये च लक्षणेन तु लक्ष्यते ।
यथापूर्वमिमे श्रेष्ठाः शुद्धापारदवर्णकाः ॥ 49

शरीरकान्तिजनका भोगदा बहुयोषितः ।
नपुंसकाः स्वल्पवीर्याः (पमदाः)[कामुकाः] सत्त्ववर्जिताः ॥ 50

**अथ दोषाः—**

जलबिन्दुर्यवो रेखा वै(श्यस्य)[षम्यं] काकपादवत् ।
दोषाः पञ्च समाख्याताश्चाशुभैकफलप्रदाः ॥ 51

अङ्के काकपदाकारं रक्तबिन्दुकलाञ्छितम् ।
सन्तानं नश्यते वज्रं क्षेमकार्याय न क्वचित् ॥ 52

रेखासु (मलिनं)[मीलनं] स्फोटं रत्नमध्ये भवेद्यदि ।
तद्रत्नं निष्फलं प्रोक्तं रत्नशास्त्रविशारदैः ॥ 53

(धागणी पदाराय)[ऊर्ध्वं चासिप्रहाराय] छेदच्छेदाय बिन्दुभिः ।
गजवाजिजयो रक्तः पीतो वैरक्षयो भवेत् ॥ 54

Indira Gandhi National

आयुर्धान्यं धनं लक्ष्मीं कृष्णो नामपदं क्षयेत् ।
सव्यं स्यादपसव्यं च च्छेदच्छेदोर्ध्वगोपि च ॥ 55

वज्रे चतुर्विधा रेखा बुधैर्लेखोपलक्षिताः ।
लघवोऽष्टौ च षट् कोणा तीक्ष्णधारासुनिर्मला ॥ 56

वज्रं काकपदोपेतं ध्रुवं मृत्युं विनिर्दिशेत् ।
स(बह्यभूतसं) बाह्याभ्यन्तरं भिन्नं भग्नं कोणं सुवर्तुलम् ॥ 57

न समर्थं भवेत्तस्य शुभाशुभफलोदये ।
रक्तबिन्दुसमायुक्तं भग्नं काकपदान्वितम् ॥ 58

वज्रं न शस्यते पुंसां क्षेमाय विजयाय च ।
अशुद्धवज्रं हृ[त्पार्श्व] पीडाकुष्ठरुजाकरम् ॥ 59

पाण्डुतापगुरुत्वं च तस्मिन्वज्रविशोधने [न्वज्रं विशोधयेत्] ।
पाण्डुरोगं पार्श्वपीडां कीलसन्दोहसन्ततिः ॥ 60

रोगा(निलं)[दिकं] गुरुत्वं च (द) [ध](न्ते)[त्ते]वज्रमशोधितम् ॥ 61

इति **श्रीरत्नदीपिकायां** वज्राणां
शुभाशुभकथनं नाम
प्रथमज्योतिः

---

## —द्वितीयं ज्योतिः—

॥ अथ मुक्तापरीक्षा ॥

### तत्र मौक्तिकं चाष्टविधम्—

जीमूतकरिम(च्छा)[त्स्या] हिवंशशङ्खवराहजाः ।
शुक्त्युद्भवाश्च विज्ञेया अष्टौ मौक्तिकजातयः ॥ 1

तेषामेकं सुल(ब्धं)[भ्यं[ च शुक्तिजं लोकविश्रुतम् ।
कदाचिद्बहुभिः कालैः दृश्यते मौक्तिकं फलम् ॥ 2

जीमूते परिशुक्लाभं करौ पाटलभा(स्क)[स्व] रम् ।
मत्स्ये (श्वेतानि)[श्वेतन्तु] तद्वच्च फणीन्द्रे नीलभा(स्क)[स्व]रम् ॥ 3

हरि(श्वेते)[च्छेवतं] तथा वंशे पीतश्वेतं च सूकरे ।
श(स्यमु)[ङ्खशु] क्तिभवं श्वेतं मुक्तारत्नमनुत्तमम् ॥ 4

शङ्ख(ए)[शु] क्तिभवं (त)[य] च क्षीरोदधिसमुद्भवम् ।
सुवृत्तं सुप्रभं तुङ्गं मुक्तारत्नं प्रशस्यते ॥ 5

शीतलं प्रा(गन्धं)[णदं] शुक्लं गुरु स्वच्छं सुनिर्मलम् ।
तेजोऽधिकं सुवृत्तं च मौक्तिकं गुणवत्तरम् ॥ 6

**तत्र सर्वलोकप्रसिद्धशुक्तिमुक्तालक्षणं वक्ष्यते—**

सुरत्नं गुरु स्निग्धं सुवृत्तं निर्मलं स्फुटम् ।
कथ्यन्ते रत्नशास्त्रज्ञैः मौक्तिकस्य च षट् गुणाः ॥ 7

मधुपीतसितत्वं च छाया च त्रिविधा मता ।
ज्ञातव्या रत्नशास्त्रज्ञैः मुक्ताच्छाया विनिर्णयात् ॥ 8

शुक्लत्वं च सुवृत्त(त्वे)[त्वं] ऋजुसूक्ष्मसुरन्ध्रता ।
सुकान्तित्वं च(संख्याते)[शस्यन्ते] रत्नशास्त्रविशारदैः ॥ 9

श्वेतो रक्तस्तथा पीतः कृष्णश्चैव यथाक्रमम् ।
(यवतुल्यं)[यावन्मूल्यं] श्वे(ताख्ये)[तस्य] मुक्तारत्नस्य कीर्तितम् ॥ 10

चतुर्थां(स)[श] विहीनत्वं क्रमा(त्क्षव्या)[द्रक्ता) दिके मणौ ।
नीलच्छायं सुवृत्तं च कर्कटीफलसन्निभम् ॥ 11

(बाह्याश्च([बाहांश्च] रत्नसम्पत्तिं गजवाजिपुरस्सराम् ।
प्राप्नोत्ये(वं)[व] सदा सोऽपि गृहे यस्य स्थितो मणिः ॥ 12

बदरीफलमात्रन्तु दीप्तं वर्षोपलैस्समम् ।
तद्रत्नं लक्षणं प्रोक्तं भुक्तिमुक्तिफलप्रदम् ॥ 13

नव दोषा गुणाः पञ्च छायाकान्तिविभागतः ।
मूल्यं चाष्टविधं प्राह मौक्तिकस्य धनेश्वरः ॥ 14

**अथ दोषाः—**

सच्छिद्रं कर्कशं क्षुद्रमारक्तमति चायतम् ।
मलिनं निष्प्रभं चित्रं भग्नं च मौक्तिकं त्यजेत् ॥ 15

**अथ गुणाः—**

स्वच्छभावं सुवृत्तं च गुरु स्निग्धं च निर्मलम् ।
तुङ्गबिन्दुसमाभं च मुक्तारत्नमनुत्तमम् ॥ 16

श्वेतच्छायो भवेद्विप्रः क्षत्रियश्चार्करश्मि(के)[घृत्] ।
पीतच्छायो भवेद्वैश्यः शूद्रः कृष्णरुचिर्मतः ॥ 17

अष्टाभिः सितसिद्धार्थैर्यवतण्डुलमुच्यते ।
यवै(श्चातुर्भवेद्गुञ्जा)[श्चतुर्भिर्गुञ्जा स्यात्] तथा मूल्यं विनिर्दिशेत् ॥ 18

सुवृत्तं सुप्रभं श्वेतं गुञ्जामात्रमनुत्तमम् ।
पञ्चविंशति तन्मूल्यं रत्नशास्त्र उदाहृतम् ॥ 19

अनेकोत्तरमूल्येन गुञ्जावृद्धिक्रमेण च ।
मुक्तायां क्रियते मूल्यं गुणदोषप्रभावतः ॥ 20

गुञ्जानान्तु चतुष्ष(ष्टि)[ष्ट्या] प(दा)[द्मा]नकमितीरितम् ।
उत्तमं मौक्तिकं[य]च तद्रत्नं कोटिभाजनम् ॥ 21

माने(च)[न]व(र्ते)[र्धे] ते मुक्ता तथा मूल्यं प्रव(र्ते)[र्धे]ते ।
हीयते च तथा मुक्ता यथा हीना च जायते ॥ 22

मौक्तिके यदि सन्देहः कृत्रिमः सहजोऽपि वा ।
परीक्षा तत्र कर्तव्या रत्नशास्त्रविशारदैः ॥ 23

क्षिपे(द्वै)[द्गो]मूत्रभाण्डे तु लवणक्षीरसंयुते ।
स्वेदयेद्वह्निना वाऽपि श्वेतवस्त्रेण वेष्टयेत् ॥ 24

हस्ते मौक्तिकमादाय व्रीहितुषेण(वेष्ट)[घर्ष] येत् ।
कृत्रिमं (यदि वैवर्ण्यं)[याति वैरस्यं]सहजं(च्यातिदिश्यते)[चातिदीप्यते]॥ 25

मौक्तिकन्तु मधुरं सुशीतलं दृष्टिदोषशमनं वि(शा)[षा] पहम् ।
राजयक्ष्मपरिकोपनाशनं सा(र)[ब] कं भवति वीर्यपुष्टिदम् ॥ 26

॥ इति **श्रीरत्नदीपिकायां**

मुक्तालक्षणकथनं नाम

द्वितीयं ज्योतिः ॥

---

## —तृतीयं ज्योतिः—

### अथ माणिक्यपरीक्षा

सिंहले च सुवेले च मलये गन्धमादने ।
समुद्रस्योदरे कच्छे माणिक्योत्पत्तिभूमयः ॥ 1

माणिक्यस्य प्रवक्ष्यामि जातिभेदचतुष्टयम् ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति यथाक्रमम् ॥ 2

आनीलं लोहितं रत्नं रत्नसौगन्धिकं भवम् ।
नानाभिर्धातुभिर्बद्धं तद्रत्नं कुरुविन्दकम् ॥ 3

श्या[स्फ]टिकोत्थं भवेच्छुद्धं इति वश्येशिका गुणाः (?) ।

### अथ स्वरूपलक्षणम्—

रत्नं श्वेतं भवेद्विप्रः (निरि)[सुर]क्तं क्षत्रियः श्रुतः (?) ॥ 4

रक्तोऽपीतो भवेद्वैश्यः रक्तपीतस्तथाऽन्त्य(कः)[जः] ।
शोणपद्म(मिवा)[निभा]कारं रक्ताङ्गारसमप्रभम् ॥ 5

Centre for the Arts

पिकनेत्रारुणं वाऽपि सारसाक्षनिभं भवेत् ।
कोक(स्व)[ख] ञ्जननेत्राभं दो[षा] अग्निसमप्रभम् ॥ 6

दाडिमं किंशुकाभं च क्षत्रियं कुरुविन्दकम् ।
हिङ्गुलं(द)शोणपुष्पा[भं]........कृष्णं च लोहितम् ॥ 7

जपालाक्षारसप्रायं वैश्यं सौगन्धिकं मतम् ।
सुरक्तकान्तिहिनशाल्लोहलेखश्च चिक्यणः (?) ॥ 8

मांसखण्डसमाक[रश्चान्त्यजः]पापकारकः ।
यन्मूल्यं पद्मरागस्य तन्मू(लं)[ल्यं](प्र)[परि] कीर्तितम् ॥ 9

तावन्मूल्यं चतुर्थांशहीनं श्यामलकन्दकम् ।
यावन्मूल्यं समाख्यातं वैश्यवर्णेषु सूरिभिः ॥ 10

तावन्मूल्यचतुर्थांशो (हि एते)[दीयते] शूद्रजन्मनि ? ।
लघुरत्नं प्रशंसन्ति गुरुत्वं पद्मरागकम् ॥ 11

मुक्ताफलं कोमलं च सुनीलं श्वेतरक्तकम् ।
ऊर्ध्ववर्तित्वधोवर्ति पार्श्ववर्ति तमोमणिः ॥ 12

पिण्डगौरवभेदेन उत्तमाधममध्यमाः ।
यो मणिर्दृश्यते दूरात् जलवह्निसमच्छविः ॥ 13

जलकान्तिस्स विज्ञेयो रत्नशास्त्रविशारदैः ।
बालार्का........कृत्वा दर्पणो धारये...........सि(?) ॥ 14

तत्र कान्तिविभागेन जातिमूल्यं विनिर्दिशेत् ।
एकद्वित्रिचतुःपञ्चसिद्धसिद्धार्थमानतः ॥ 15

वृत्तिर्भवति रत्नानां तत्तन्मूल्यं विनिर्दिशेत् ।
........वति मणेश्चैव जवो—प्रमाणतः ॥ 16

दशोत्तरशतत्वं च पद्मरागस्य मूल्यता ।
सर्षपे पात्रकान्तिश्च एकैकं वर्तते यदि ॥ 17

शापये द्विगुणं मूल्यं यावद्विंशतिसर्षपाः । (?)
सन्देहो जायते कश्चित्कृत्रिमस्सहजोऽपि वा ॥ 18

अन्योन्यं घर्षयेद्रत्नं रेखा तस्माद्विपद्यते ।
नीलं वा पद्मरागं वा रत्नं तेनैव लक्ष्यते ॥ 19

वज्रं वज्रतरेणैव नात्र कार्या विचारणा ।
शुद्धमाणिक्यजो घृष्टो नैव लोहेन भिद्यते ॥ 20

ऊर्ध्ववर्तिश्शतावेन स मणिर्धनदः शुचिः (?) ।
तदो सविपवाभिन्नं शर्करा नशुनोद्भवम् (?) ॥ 21

कोमलद्रुमयन्त्रश्च स मणिर्दोषदो भवेत् ।
(आ)[अं]कोलफलशङ्खाख्यं पुत्रसौभाग्यनाशनम् ॥ 22

अशोकफलवाडं च दरिद्रत्वं करोति हि ।
धनाढ्यं पुत्रसौभाग्यं करोति मधुसन्निभम् ॥ 23

अङ्कदिनं च यद्रत्नं (जस्व)[यस्य] वेश्मनि तिष्ठति ।(?)
अपवाददरिद्रत्वं चिन्ताशोकभयं भवेत् ॥ 24

॥ इति **श्रीरत्नदीपिकायां**

मुक्तालक्षणकथनं नाम

द्वितीयं ज्योतिः ॥

---

## —चतुर्थं ज्योतिः—

अथ नीलपरीक्षा

चतुर्धा नीलमाख्यातं वर्णभेदेन सूरिभिः ।
उत्पत्तिर्विविधा तस्य (आ)[त्वा]करे दैवयोगतः ॥ 1

श्वेतनीलं पीतनीलं र(त्न)[क्त]नीलमथापि वा ।
कृष्णनीलं तथा ज्ञेयं ब्राह्मणादिक्रमेण च ॥ 2

सिंहले च कलिङ्गे च नीलानामाकरं विदुः ।
उत्तमं सिंहलोद्भूतं मध्यमं च कलिङ्गजम् ॥ 3

नील(श्च)[स्य] षड्विधा दोषा गुणाः पञ्चविधास्तथा ।

**अथ दोषाः—**

शूद्रकं पाटलच्छायं कर्कराभासछिद्रकम् ॥ 4

मूल्यं षोडशकं प्रोक्तं छायाभद्रगुणैर्भवेत् ।
मृद्पाषाणरौप्यं च महानीलश्च दूषणम् ॥(?) 5

शूद्रके च दरिद्रत्वं पाटले शत्रुविग्रहः ।
छायया कान्तिहानिश्च पैशुन्यं त्रिषु जायते ॥ 6

देशत्यागं दरिद्रत्वं कर्कराथाः फलं महत् ।
त्र्यंश्र शत्रुभयं दत्ते चित्रकृष्णं विनिर्दिशेत् ॥ 7

एवं बहुविधा दोषास्त्याज्या रत्नस्य सूरिभिः ।
गुणां(स्ते)[श्चै] षां प्रवक्ष्यामि यथादृष्टं पुरातनैः ॥ 8

गुरुः स्निग्धश्च वर्णाढ्यः पार्श्ववर्त्यभिरञ्जनः ।
इन्द्रनीलः समाख्यातः चतुर्भिश्च महागुणैः ॥ 9

छायां चैषां प्रवक्ष्यामि यथाप्युक्ता पुरातनैः ।
(चतृजाती)[चतुर्जाति] विभागे(न उ)[नाप्यु] त्तमाधममध्यमाः ॥ 10

नीला च शुककण्ठाभा(अ)[प्य] तसीकुसुमप्रभा ।
कोकिलाकण्ठसङ्काशा बर्हिकण्ठसमप्रभा ॥ 11

[काक] पक्षसमा का (चिद्वि)[न्तिर्वि] विधा तस्य दृश्यते ।
दोषहीने गुणाढ्ये च (उ)[ह्यु]त्तमाकरसम्भवे ॥ 12

नीलमूल्यं प्रवक्ष्यामि मणेर्मत्यनुसारतः ।
यन्मूल्यं पद्मरागस्य सगुणस्य प्रकीर्तितम् ॥ 13

तन्मूल्यं शक्रनीलस्य मुनिभिः परिकीर्तितम् ।
पयोमध्ये क्षिपेन्नीलं सुनीलं तत्पयो भवेत् ॥ 14

इन्द्रनीलस्स विज्ञेयो रत्नशास्त्रविशारदैः ।
एतद्गुणविशिष्टो यो लोकानां हितकारकः ।
परीक्षा शक्रनीलस्य (सूरिभिः परि)[बुधैरेवं प्र] कीर्तिता ॥ 15

॥ इति **श्रीरत्नदीपिकायां**

माणिक्यरत्नकथनं नाम

तृतीतं ज्योतिः ॥

---

Indira Gandhi National

## —पञ्चमं ज्योतिः—

### ॥ अथ मरकतपरीक्षा ॥

सुस्वच्छं गुरु वर्णाढ्यं रुचिसुस्निग्धवेणुकम् ।
षड्गुणाः पञ्चदोषाश्च संयुक्तं च विषापहम् ॥ 1

चतुर्विधा(च)[नि] ते(जातिः)[जांसि] महामरकतस्य च ।
प्रथमं शैवलाभं च शुकाभमपरं भवेत् ॥ 2

शिरीषकुसुमाभं च चतुर्थं तुच्छवर्णकम् ।
हरित(स्य)[च्छ] विमध्ये तु कृष्णच्छाया हि शोभना ॥ 3

ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति यथाक्रमम् ।
छायाभेदेन विज्ञेयाश्चतुर्वर्णाः क्रमेण च ॥ 4

नलिनीपत्रमध्यस्थं यथा वारि तथा स्थितम् ।
एषा मरकतच्छाया निर्मला तु भविष्यति ॥ 5

मणिर्मरकतो नाम नाग(पीत)[पित्त] समच्छविः ।
तुरुष्कमगधे तस्या(आ)[प्या] करोत्पत्तिमूमयः ॥ 6

उत्तमं हि तुरुष्के च मध्यमं मगधोद्भवम् ।
पिण्डकान्तिस्वभावेन मूल्यं सर्वत्र(यू)[यु]ज्यते ॥ 7

शुकपक्षनिभा काचिद्वंशपत्रसमप्रभा ।
शिखिपिञ्छनिभा काचिज्जयन्तीपत्रकोपमा ॥ 8

एवं बहुविधा कान्तिर्दृश्यते हरिते मणौ ।
स्निग्धत्वं च गुरुत्वं च तेजस्त्वं पिण्डसंस्थितिः ॥ 9

चतुर्भिर्लक्षणैर्युक्तो यदि (स्यान्म[मा])रकतो मणिः ।
(अ)[स]विघ्नः सर्वरोगाणां पन्नगादंशना (य)[त]था ॥ (?) 10

धारणं तस्य यत्नेन नात्र कार्या विचारणा ।
सप्त दोषा गुणाः पञ्च छायाश्चाष्टविधाः स्मृताः ॥ 11

मूल्यं द्वादशकं प्रोक्तमारक्तं च गुणागुणैः ।
रूक्षत्वं चैव विस्फोटं वि(ख्यातो)[षाणौ] मणिभिस्तथा ॥ 12

कर्करो[जठरं]चैव वसरः सप्तमः स्मृतः ।
र(क्षो) [क्षेत्]व्याधे (निविष्टेन)[र्नै विस्फोटं] पाताद्रूक्षत्वमेव च ॥ 13

श्रृङ्गे च रोगशोकादि कर्करो दुःखदायकः ।
शिखा व्याघ्रभयं(द)[ध] त्ते वसरो मृत्युमेव च ॥ 14

इमे दोषाः समाख्याता रत्नशास्त्रविशारदैः ।
गुणां(न्ते)[श्चै] षां प्रवक्ष्यामि यथोद्दिष्टं पुरातनैः ॥ 15

(आकोरपातितो)[आकरोत्पत्तितः] कृत्वा यावन्मूल्यं सुनिश्चितम् ।
सर्वत्र सकलैर्देवैः कल्प्यते(ब)[बा] हुताडने ॥ 16

याव(च्छविश्च)[त्सन्दिश्य] स(म्भू)(द्भू)तिः ताव(का)[दा]दर
(शने)[से] चनम् । (?)
क्रियते या(कतिचिति)[करिद्भिश्च] काकलीभिर्महामणिः ॥ (?) 17

विक्रीयते महीपालैः स्वर्णकोटिशतैश्च वा ।
गारुडोऽयं मणिर्धार्यस्सर्वलक्षणसंयुतः ॥ 18

विषघ्नः पुण्यदो धन्यो धनदो मण्ड(लो)(नो)त्तमः ।
स्वच्छता गुरुता कान्तिः(सिद्ध)[स्निग्ध] त्वं पिण्डगौरवम् ॥ 19

हरित्त्वं रञ्जकत्वं च सप्तैते मरकते गुणाः ।
पद्मपत्रगतः स्वच्छो जलबिन्दुर्यथा भवेत् ॥ 20

तथा मरकतच्छाया श्यामला हरिताऽमला ।
य(सु)[स्तु]भासुरसर्वाभ(स्त्या)[स्स्तू]यते स महामणिः ॥ 21

Indira Gandhi National

रञ्जये (त्कश्च)[दाम] पक्षैस्तं महामरकतं हरि(ः)[त] ।
चतुर्धा जातिभेदैस्तु महामरकते मणौ ॥ 22

छायाभेदेन विज्ञेयं(छायाभेदैश्च)[जातिभेदस्य] लक्षणम् ।
(गण्ड)[गुप्त] पिण्डसमायुक्ते हि(ते)[म] श्यामलभास्करे ॥ 23

मूल्यं द्वादशकं प्रोक्तं वर्णभेदेन सूरिभिः ।
यथा पङ्कजरा(जा)[ग]स्य मणेर्मूल्यं प्रकीर्तितम् ॥ 24

स्वभावमूर्ध्नि वर्तित्वं पार्श्वे हरितकोमले ।
क(स्थत्वं)[थितं] वंशमध्ये तु (य)[त] न्मूल्यं यवकैर्भवेत् ॥ 25

यवैके(तु)[न] शतं पञ्च सहस्रद्विगुणं तथा ।
त्रिभिश्चैव सहस्रे द्वे चतुर्भिश्च चतुर्गुणम् ॥ 26

Indira Gandhi National Centre for the Arts

## अथ दोषाः

द्विच्छाय(ा) कान्ति(हानिश्च)[हीनं]ञ्च रूक्षं रा(ज)[ग]विवर्जित(ः)म् ।
महामरकतं रत्नं दोषयुक्तं विवर्जयेत् ॥ 27

रूक्षं च ग(रलं)[रुडं] स्फोटं पाषाणमलिनं तथा ।
श[क]र्करा जठरं चैव शवलं तेऽपि सप्त वै ॥ 28

जठरं मन्ददीपि स्याच्छबलं(थहि)[बहु] वर्णकम् ।
रूक्षदोषेण संयुक्त(दं) सर्वव्याधिप्रद(ा) भवेत् ॥ 29

(बन्धु)[वपू]रोधो भवेत् क्षिप्रं मलिनं दोषसंयुतम् ।
वैधव्यं पुत्रशोकं च (श)[क] र्करादोषसंयुतम् ॥ 30

जठरादोषसंयुक्तं दंष्ट्रिणोऽ(म्रिभ)[म्रिभ]यं भवेत् ।
शबल[ा] दोषसंयुक्तं भूषणाथ(ा)(नि)[न] धारयेत् ॥ 31

सदो[षे](ः) पद्मरागे तु यथा मूल्यं तु हीयते ।
तथा मरकते मूल्यं हीयते दोष(वर्ण)[दर्श]नात् ॥ 32

स्निग्धे चतुर्धा-जातौ च लक्षे दोषं विवर्जयेत् ।
निस्तेजसि वपा वै........शूद्रे चाष्टमता मता ॥ 33

कृत्रिमत्वं य(वा)[दा]रत्ने शक्यते सुरभिः क्वचित् ।
घर्षयेत्प्रस्तरे रत्नं काच(तरकवि)[स्तस्माद्वि] पद्यते ॥ 34

लेखयेल्लोह(शीर्षे तु)[शृङ्गेण](अथ तूर्णेन)[चाथ शृङ्गेण]लेपयेत् ।
सहजः कान्तिमायाति कृत्रिमो मलिनो भवेत् ॥ 35

इति **श्रीरत्नदीपिकायां**

**मरकतलक्षणकथनं नाम**

**पञ्चमं ज्योतिः ॥**

---

## —षष्ठं ज्योतिः—

॥ अथ गोमे(ध)[द]परीक्षा ॥

स्वच्छकान्तिर्गुरुस्स्निग्धो वर्णाढ्यो बहुभिर्वरः । (?)
धवलः पि(शिरो)[ञ्जलो] धन्यो गोमे(ध)[द](ईरितः)[इति विश्रुतः] ॥ 1

चतुर्धा जातिभेदैस्तु गोमे(धो)[दो]ऽपि प्रकीर्तितः ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चेति यथाक्र(मात्)[मम्] ॥ 2

यथा जीवित(रत्नसारे)[रत्नाकरे]—

आहोचितं वराहश्च य(द्र)[त्र] गोमेदलक्षणम् ।
मधुबिन्दुसमच्छायं गोमूत्रच्छवि निर्मलम् ॥ 3

गोमेदकं तथा(क्षा)[ख्या]तं रत्नं सर्वगुणावहम् ।
द्विच्छायं लघु रूक्षाढ्यं पाटलं नि(ष्ट)[ष्प्र]भं त्यजेत् ॥ 4

**अथ तद्गुणाः—**

गोमेदं कफ(पीत)[पित्त]घ्नं क्षयपाण्डु वि(सा)[षा]पहम् ।
रुच्यं वह्निकरं(च्छि)[स्वि]न्नं रोचनाभिर्विशुध्यति ॥ 5

प्रवा(लो)[ले] रजतं मूल्यं गोमे(दो)[दे]ऽपि तथैव च ।
वैडूर्ये पुष्परागे च मूल्यं स्वर्णसमं भवेत् ॥ 6

इति **श्रीरत्नदीपिकायां**
गोमेदलक्षणं नाम
षष्ठं ज्योतिः ॥

---

**—सप्तमं ज्योतिः—**

॥ मणिगुणकथनम् ॥

**अथ स्फटिकपरीक्षा—**

स्फटिकं दाडिमीबीजमशोकमधुवर्णकम् ।
काम्बोजरत्नगन्धाढ्यं स्फटिकं च त्रिरङ्गकम् ॥

**तद्दोषाः—**

तत्त्वसारं नीलवर्णं निष्प्रभं च त्यजेद्बुधः ।

**[अथ भस्माङ्कमणिः]—**

पीत[:] श्याम[:] समस्स्निग्धः शिलारेखासमन्वितः ॥ 2

भस्माङ्क इति ख्यातः कथितो मणिरुत्तमः ।

**अथ गारुडो (जा)[द्गा] रपरीक्षा—**

बहुपीतः(शिवः)[सितः] श्यामै (रुत्पीतः)[रपीतो] बिन्दुवर्जितः ॥ 3

स भवेद्गारुडो(जा)[द्गा]रः पीतश्यामरुचिर्मणिः।

**अथ तार्क्ष्यमणिः—**

हरि(क([द्र]र्णो गुरुः स्निग्धो वह्निवत्तार्क्ष्य उत्तमः॥ 4

विकटं निष्प्रभं नीलं पीतं तार्क्ष्यं परित्यजेत्।

**अस्य गुणाः—**

ज्वरच्छेदी वि(श्व)[ष] ज्वालासन्निपाताग्नि(मन्द)[मान्द्य]कृत्। 5

**अथ गरुडमणिः—**

पक्वजम्बूफलाकारः स्निग्धकान्तिसमन्वितः।
शुक्लरेखान्वितः पश्चात्स्वच्छः स्याद्गरुडो मणिः॥ 6

**अथ आस्तिकमणिः—**

यस्तोयं लोहितं कुर्यादन्ते वर्णचतुष्टयम्।
आस्तिक्यं वंशजातोऽसौ मणिः सर्वविषापहः॥ 7

**अथ सुवर्णरेखामणिः—**

लोहितो वर्तुलः स्निग्धः शुक्लरेखासमन्वितः।
मणिः सौवर्णरेखाख्यो ज्ञेयः सर्वविषापहः॥ 8

इति **श्रीरत्नदीपिकायां**

मणिगुणकथनं नाम

सप्तमं ज्योतिः॥

## —अष्टमं ज्योतिः—

॥ वैडूर्यपुष्परागमणिगुणकथनम् ॥

### अथ वैडूर्यपरीक्षा—

मार्जार(मेद्र)[नेत्र] सङ्काशं रसाण[ल]प्रतिमं हि वा (?) ।
कठिनं निर्मलं पुण्यं वैडूर्यमेव मङ्गलम् ॥ 1

शुकपुच्छच्छाविसमः कीकिला(क्ष च)[स्यश्च] सम्मत(म्)[:] ।
शिखिकण्ठाकृतिः कश्चित् वैडूर्यो मणिरुत्तमः ॥ 2

वैडूर्यं श्यामपुच्छाङ्गं सुस्वच्छं स्फटिकप्रभम् ।
उत्तरीयेण हरितं श्यामलं(न च)[च न] शोभितम् ॥ 3

### अथ गुणाः—

वैडूर्यं(कफपीत)[रक्तपित्त] घ्नं प्रतिज्ञाबलवर्धनम् ।

Indira Gandhi National Centre for the Arts

### अथ पुष्यरागपरीक्षा—

बाणपुष्पसमः कान्तः स्वच्छभावः कचिद्गुणः ॥ 4

पुत्रदो धनदः पुण्यः पुष्यरागमणिर्भवेत् ।
पुष्परागं गुरु स्निग्धं कर्णिकारसमप्रभम् ॥ 5

कर्कशं पीतकृष्णं च वर्जितं रत्नपण्डितैः । 5½

॥ इति **श्रीरत्नदीपिकायां**

(उपरत्नलक्षण) [वैडूर्यपुष्परागमणिगुण] कथनं नाम

अष्टमं ज्योतिः ॥

---

## —नवमं ज्योतिः—

॥ अथ प्रवालपरीक्षा ॥

याव (ब) द्बन्धूकसिन्दूरदाडिमीकुसुमप्रभम् ।
स्निग्धलोहितलेखं च तं प्रवालम (णिद्युतिः) णिं विदुः ॥ 1

शोणिता(क्षं)[ख्यं] यदा गच्छेत् प्रयत्नात्कथिते सति ।
प्रवालं नाम तद्रत्नं शमकं शोकनाशनम् ॥ 2

पक्वबिम्बसमच्छायं निर्मलं विद्रुमं समम् ।

**अस्य दोषाः—**

पाण्डुरं सर्वरूक्षत्वं वक्रं लघु च नेष्यते ॥ 3

**अस्य गुणाः—**

क्षय(पीता)पित्ताम्लवातघ्नं विषघ्नं पाच(नं)[कं] लघु ।
विद्रुमं निर्मलं स्विन्नं सर्वदोषरुजापहम् ॥ 4

इति **श्रीरत्नदीपिकायां**

(उपरत्न)[प्रवाल] लक्षणकथनं नाम

नवमं ज्योतिः ॥

---

निर्दोषं यदि वज्रकं खलु भवेद्विप्रः परं सिद्धिदो
मृत्युः क्षत्रिय उत्तमः क्षयसशंदत्ते च वैश्यस्तथा ।
शूद्रो हन्ति रुजाकरं खलु तथा वीर्यं च सर्वे क्रमा-
द्विप्रक्षत्रियवैश्यशूद्रविषये यो या नरैः पण्डितैः ॥ 1

वज्रं चेन्न तु काकपादसहितं मृत्युं ददाति ध्रुवं
पुत्रं हन्ति च रक्तबिन्दुसहितं निर्मांति नो मङ्गलम् ।
रेखाबिन्दुसमायुतं यदि भवेत् तन्निष्फलं गीयते
सर्वैश्शास्त्रविशारदैर्यदि भवेद्वैश्यैस्तु दोषैर्युतः ॥ 2

दन्ते च्छेदमणिः श्रियं क्षपयति स्तम्बेरमाख्योन्नतां
शूद्रश्चेत्किल तादृशः क्ष[प]यति(ल)[ ]क्ष्मायुर्धनानि ध्रुवम् ।
भग्नस्स्याद्यदि विद्रुमो विति नृणां नो मङ्गलामङ्गलं
तत्वे दूषितमातनोति सकलं व्याधिं ततः शोधयेत् ॥ 3

निर्दोषं द्युतिमौक्तिकं क्ष[प]यति(पु) व्याधिं विषघ्नं भवेत्
वीर्यतादिति सारकं भवति त(था)द्धन्ति क्षयाख्यं गदम् (?) ।
माणिक्यं सगुणं ददाति (द)[म]नुजस्य भाग्यमावश्यकं
तत्त्वे दोषयुते करोति च भयं चिन्तायशोकं तथा ॥ 4

दारिद्र्यं च तथाऽपकीर्तिमपि चेन्नीलं च दोषैर्युतं
दारिद्र्यं विदधाति (श)[जा] तु कलहं निष्कान्तिभावं तथा ।
देशत्यागमणिर्ध्रुवं वितनुते कृष्णं विचित्रं तथा
त्रासञ्चैव गरुन्मणिर्यदि भवेद्दोषैस्समस्तैर्ध्रुवम् ॥ 5

रोगाद्रक्षति नैव नून् खलु तथा धाता विधत्ते नृणां
दुःखं व्याघ्रकृशानुभीश्च मरणं चा(शौ)[पौ] युतश्चेद्गुणैः(?) ।
दत्ते दिव्यधनं ददाति च महा........विषघ्नो भवेत्
धन्यो मण्ड(ल)[न] मुत्तमं यदि भवेद्गोमेदकः सद्गुणः ॥ 6

पाण्डुं हन्ति कफं च पित्तमधिकं घोरं विषं च क्षयं
दत्ते कान्तिमपि ध्रुवं वितनुते नृणां विचण्डाननम् ।

पुण्यं सत्तनुजं धनं च तनुते यत् पुष्यरागं नृणां (?)
वैडूर्यं खलु रक्तपित्तशमकं दत्ते प्रतिज्ञाबलम् ॥ 7

नृणां विद्रुममुत्तमद्युति विषं चाम्लं च पित्तं क्षयं
वातं हन्ति करोति पाकमधिकं दत्ते च कान्तिं ध्रुवम् ।

सर्वेषां नवपूर्वरत्नकरुचं शर्मप्रदं च ध्रुवं
धार्यं तद्गुणसंश्रितं खलु सदालङ्कारमाणं जनैः ॥ 8

सू(र्यो)[र्ये] पङ्कजरागमिन्दुविषये मुक्ता कुजो विद्रुमं
पालाशं खलु रत्नमिन्दुतनुजः तत्पुष्यरागो गुरुः (?) ।

नीलं चैव शनैश्चरस्य विषये राहुश्च वैडूर्यकं
शुक्रो वज्रमपि सुतं च विहितं केतौ च गोमेदकम् ॥ 9

इत्येवं नव कीर्तितानि मुनिभिः रत्नानि सर्वग्रह—
प्रीत्यै व्यासवराहनारदमुखैः सर्वज्ञभावं गतैः । 9½

Indira Gandhi National
Centre for the Arts

## श्री चण्डेश्वरकृता

रत्नदीपिका

समाप्ता ॥

———

श्रीः

## बुद्धभटीयं नाम

# ॥ रत्नशास्त्रम् ॥

## ॥ बुद्धभटप्रणीतम् ॥

(रत्न)[मूर्ति]त्रयाय भुवनत्रयवन्दिताय
कृत्वा नमस्समवलोक्य च रत्नशास्त्रम् ।
रत्नप्रवेकमधिकृत्य विमुच्य फल्गून्
संक्षेपमात्रमिति **बुद्धभटेन** दृष्टम् ॥ 1

भुवनत्रितयाक्रान्तप्रकाशीकृतविक्रमः ।
बलो नामाभवच्छ्रीमान् दानवेन्द्रो महाबलः ॥ 2

असकृत्संयुगे येन भज्यमाने दिवस्पतौ ।
नोदुवाह शची वीरपत्नी गर्वोन्नतं शिरः ॥ 3

अशक्नुवद्भिर्निर्जेतुं तं युद्धे युद्धशालिनम् ।
वरव्याजेन पशुतां प्रार्थितस्स सुरैर्मखे ॥ 4

सासिकानां स सत्त्वस्य वरं प्रत्यादिशद्वशी । (?)
शौण्डीर्यमानी विबुधांस्तथेति प्रत्यपद्यत ॥ 5

धैर्यादगणितप्राणपरित्यागार्तिसंभ्रमः ।
पशुवत्सोऽपि शस्त्रस्तैस्स्ववाक्पाशनिबन्धनः ॥ 6

तस्य जातिविशुद्धस्य परिशुद्धेन कर्मणा ।
कायस्यावयवास्सर्वे रत्नबीजत्वमाययुः ॥ 7

देवानामथ यक्षाणां सिद्धानां पवनाशिनाम् ।
रत्नबीजं स्वयं ग्राह्यमभवत्सुमहत्तदा ॥ 8

तेषां सम्पततां वेगाद्विमलेन विहायसा ।
यद्यत्पपात रत्नानां बीजं क्वचन किञ्चन ॥ 9

पयोनिधौ सरित्तीरे पर्वते काननेऽपि वा ।
तत्तदा(का)[क]रतां यातं स्थानमाधेयगौरवात् ॥ 10

तेषु रक्षोविषव्यालव्याधिघ्नान्यघहानि च ।
प्रा(भु)[दु]र्भवन्ति रत्नानि तथैव द्विगुणानि च ॥ 11

कुलघ्नेषूपपद्यन्ते यानि चोपगतेऽहनि ।
दोषैस्तान्युप(पी)[ची] यन्ते हीयन्ते गुणसम्पदा ॥ 12

553.8
RAT

परीक्षापरिशुद्धानां रत्नानां पृथिवीभृता (म्) ।
धारणं सम्भृ(तो)[ति] र्वापि कर्तव्यं शुभमिच्छता ॥ 13

वेत्तारो रत्नमूल्यस्य देशकालान्तरानुगाः ।
न तु शास्त्रवशादग्राह्या विद्वद्भिस्ते तु वेदिताः ॥ 14

शास्त्रज्ञः कुशलो वाग्मी रत्नानां संपरीक्षकः ।
स एव मूल्यमात्राया वेत्तेति परीकीर्तितः ॥ 15

## ॥ अथ वज्रपरीक्षा ॥

महाप्रभावं विबुधैर्यस्माद्वज्रमुदाहृतम् ।
वज्रपूर्वा परीक्षेयमतोऽस्माभिर्निगद्यते ॥ 16

तस्यास्थिलेशो निपपात येषु
भुवः प्रदेशेषु कथञ्चिदेव ।
वज्राणि वज्रायुधनिर्जिगीषोः
भवन्ति नानाद्युतिमन्ति तेषु ॥ 17

हैममातङ्गसौराष्ट्रपौण्ड्रकालिङ्गकौसलाः ।
(पेण्णा)[वेणा] तटाःससोर्पारा वज्रस्याष्टाविहाकराः ॥ 18



IGNCA RAR
ACC. No. R-216

श्यामाः पौण्ड्रभवा मतङ्गविषये नात्यन्तपीतप्रभाः
सोपारास्सितसाम्बुमेघसदृशा रक्ताश्च सौराष्ट्रिकाः ।
आताम्रा हिमशैलजाश्शशिनिभा[ः](पेण्णा)[वेणा] तटोत्थास्तथा
कालिङ्गाः कनकावदातरुचयश्शैरीषिकाः कौसलाः ॥ 19

सुस्वच्छं लघु वर्णतश्च गुणवत्पार्श्वेषु सम्यक्समं
रेखाबिन्दुकलङ्ककाकपदकत्रासादिभिर्वर्जितम् ।
लोकेऽस्मिन् परमाणुमात्रमपि यद्वज्रं क्वचिज्जायते
तस्मिन्दैवसमाश्रयो ह्यपि तथा तीक्ष्णाग्रधारं यदि ॥ 20

वज्रेषु वर्णयुक्त्या देवानां संपरिग्रहः प्रोक्तः ।
वर्णानां च विभागः कार्यो वर्णाश्रयादेव ॥ 21

असितसितरक्तपिङ्गश्यामाताम्राः स्वभावतो रुचिराः ।
हरिवरुणशक्रहुतवहपितृपतिमरुतां स्वका वर्णाः ॥ 22

विप्रस्य शङ्खकुमुदस्फटिकावदाता
स्यात्क्षत्रियस्य शशबभ्रुविलोचनाभा ।
वैश्यस्य[चारु]कदलीदलसन्निकाशा
शूद्रस्य धौतकरवालसमा(न)[च] दीप्तिः ॥ 23

द्वौ वज्रवर्णौ पृथिवीपतीनां
सद्भिः प्रदिष्टौ युधि सायु[धु]जन्यौ (?) ।
(यस्यां)[यः स्यात् ] जपाविद्रुमभङ्गशोणो
यो वा हरिद्रारससन्निकाशः ॥ 24

ईशत्वात्सर्ववर्णानां गुणवत्सार्ववर्णिकम् ।
वामतो धारयेद्राजा नान्ये वर्णाः कथञ्चन ॥ 25

अधरोत्तरवृत्त्या हि यादृक्स्याद्वर्णसङ्करः ।
तादृ(दृक्का)[गुच्चा] धरो वज्रो वर्णानां सङ्करो मतः ॥ 26

न च वर्णविभागमात्रयुक्त्या
विदुषा वज्रपरिग्रहो विधेयः ।
[सगुणं] गुणसम्पदं प्रसूते
विपरीतं व्यसनोदयस्य हेतुः ॥ 27

एकमपि यस्य शृङ्गं
विघटितमवलोक्यते विशीर्णं वा ।
गुणवदपि तन्न धार्यं
वज्रं श्रेयोऽर्थिभिर्भुवने ॥ 28

स्फुटिताश्रविशीर्णशृङ्गदेशं
मलवर्णैः प्लुषितैरुपेतमध्यम् ।
न हि वज्रभृतोऽपि वज्रमाशु
श्रियमन्याश्रयलालसां न कुर्यात् ॥ 29

यस्यैकदेशे क्षतभावभासो
यद्वा भवेल्लोहितबिन्दुचित्रम् ।
किं तन्न कुर्याद्ध्रियमाणमाशु
स्वच्छन्दमृत्योरपि जीवितान्तम् ॥ 30

कोट्यः पार्श्वाणि धाराश्च षडष्टौ द्वादशैव तु ।
उत्तुङ्गसमतीक्ष्णानि वज्रस्य करयोद षट् (?) ॥ 31

षट्कोटिशुद्धममलस्फुटतीक्ष्णधारं
वर्णान्वितं लघु सुपार्श्वमपेतदोषम् ।

Centre for the Arts

इन्द्रायुधांशुविसृतिस्फुरितान्तरिक्ष-
मेवंविधं भुवि भवेत्सुलभं न वज्रम् ॥ 32

तीक्ष्णाग्रं विमलमपेतदोष [जालं]
धत्ते यः प्रयततनुस्सदैव वज्रम् ।
वृद्धिस्तं प्रतिदिनमेति यावदायुः
श्रीसम्पत्सुतधनधान्यगोपशूनाम् ॥ 33

व्यालवह्निविषव्याधितस्कराम्बुभयानि च ।
दूरात्तस्य निवर्तन्ते कर्माण्याथर्वणानि च ॥ 34

यदि वज्रमपेतसर्वदोषं
बिभृयाद्विंशतितण्डुलं गु(रुत्वे)[रुत्वे] ।
मणिशास्त्रविदो विदन्ति तस्य
(वि)[द्वि] गुणं रू(प)[प्य] कमग्रमूल्यं ....(?) ॥ 35

त्रिभागहीनार्धतदर्धषष्ठ-
त्रयोदशत्रिंशदथार्धभागः ।
अशीतिभागोऽथ तथा शतांश-
........प्रदिष्टं................ (?) ॥ 36

द्वाभ्यां तमर्घातिमुपागतस्य
चैकावसानस्य विनिश्चयो यः ।
......................
...........................(?) ॥ 37

नचापि तण्डुलैरेव वज्राणां धारणक्रमः ।
अष्टाभि(स्सुधपैः)[स्सर्षपै]र्गौरैस्तण्डुलः परिकल्प्यते ॥ 38

यत्तु सर्वगुणैर्युक्तं वज्रं तरति वारिणि ।
रत्नवर्गे समस्तेऽपि तस्य धारणमिष्यते ॥ 39

अणुनाऽपि हि दोषेण लक्ष्यलक्षणदूषितम् ।
स्वमूल्याद्दशमं भागं वज्रं प्राप्नोति वा न वा ॥ 40

प्रकटानेकदोषस्य स्वल्पस्समशतोऽपि वा ।
स्वमूल्याच्छतभागोऽपि न वज्रस्य विधीयते ॥ 41

(स्प)[स्पृ]ष्टदोषमलङ्कारे न वज्रं योज्यते बुधैः ।
रत्नानां परिकर्मत्वमूल्यं तस्पेष्यते लघु ॥ 42

प्रथ(म)[मं] गुणसम्पदाऽभ्युपेतं
प्रतिबन्धं समुपैति यत्र दोषम् ।
अलमाभरणाय तन्नृपाणां
गुणहीना मणयः प्रदूषणीयाः ॥ 43

नार्या वज्रमधार्यं गुणवदपि सुतप्रवृद्धिमिच्छन्त्या ।
अन्यत्र दीर्घ(चिविट)[चिपुट](त्य)[त्र्य]श्रादिगणैर्विप्रनिर्मुक्तम् ॥ (?) 44

अयसा पुष्परागेण तथा गोमेदकेन च ।
वैडूर्यस्फटिकाभ्यां च काचैश्चापि पृथग्विधैः ॥ 45

प्रतिरूपाणि कुर्वन्ति वज्राणां कुशला नराः ।
क्षारैर्लेवणशालाभिः कुर्यात्तेषां परीक्षण(:)[म्] ॥ 46

गुरुता सर्वरत्नानां गौरवाधारकारणम् ।
........................................ (?) ॥ 47

वज्रैस्तैर्विलिख्यते जातिरातिं विलिखन्ति वज्रकुरुविन्दाः । ?
वज्रे वज्रं विलिखति नान्येन विलिख्यते वज्रम् ॥ 48

॥ इति वज्रपरीक्षा समाप्ता ॥

## ॥ अथ मौक्तिकपरीक्षा ॥

---

द्विपेन्द्रजीमूतवराहशङ्ख-
मत्स्याहिशुक्त्युद्भववेणुजानि ।
मुक्ताफलानि प्रथितानि लोके
तेषां हि शुक्त्युद्भवमेव भूरि ॥ 1

तस्यैव चैकस्य च मू(ल)[ल्य] मात्रं
निर्दिश्यते न त्वपरस्य जातु ।
वेध्यं तु शुक्त्युद्भवमेव तेषां
शेषाण्यवेध्यानि वदन्ति तज्ज्ञाः ॥ 2

त्वक्सारना(शे)[गे]न्द्रतिमिप्रसूतं
यच्छङ्खजं यच्च वराहजं[च] ।
प्रायो [हि] मुक्तानि भवन्ति भासा
पूज्यानि माङ्गल्यतया तथापि ॥ 3

या मौक्तिकानामिह योनयोऽष्टौ
प्रकीर्ति[ता] रत्नविनिश्चयज्ञैः ।
कम्बूद्भवं तेष्वधमं प्रदिष्ट-
मुत्पद्यते यच्च गजेन्द्रकुम्भात् ॥ 4

स्वयोनिमध्यच्छवितुल्यवर्णं
शङ्खाद्बृहत्कोणफलप्रमाणम् ।
उत्पद्यते वारणकुम्भमध्या-
दपोतताम्रप्रभया विहीना ॥ 5

Indira Gandhi National
Centre for the Arts

ये काम्बवश्शाङ्गिमुखावमश-
पूतस्य शङ्खप्रवरस्य गोत्रे ।
मतङ्गजाश्चापि विशुद्धवंशा-
स्ते मौक्तिकानां प्रभवाः प्रदिष्टाः ॥ 6

वराहदंष्ट्राप्रभवं प्रकृष्टं
वराहदंष्ट्राङ्कुरतुल्यवर्णम् ।
क्वचित्कथञ्चिन्नगभूप्रदेशे
प्रजस्वतेन्दूकरणाद्विभक्ते ॥ (?) 7

पाठीनपृष्ठस्य समानवर्णं
मीना सुवृत्तं लघुना(प)[प्य]सूक्ष्मम् ।
उत्पद्यते वारिचराननेषु
मत्स्या हि ते मध्यचराः पयोधेः ॥ 8

वर्षोपलानां समवर्णशोभं
त्वक्सारपर्व[ण्यपि ये]प्रदिष्ट(म् )[ाः] (?) ।
ते वैणवे दिव्यजनोपभोग्ये
स्थाने प्ररोहन्ति न सार्वभौम(म् )[ः] ॥ 9

भोजागमं नीलविशुद्धवर्णं
प्रमाणसंस्थानगुणैरुपेतम् ।
नितान्तधौतप्रविकम्प्यमान-
त्रिस्त्रिंशधारासमवर्णदीप्ति. ॥ 10

प्रव्यापिरत्नानि धनं श्रियो[वा]
राज्यश्रियं वा हरतीन्दु(राभाम् )[शोभम्] ।

Indira Gandhi National Centre for the Arts

भाजो हि नाऽपुण्यकृतो भवन्ति
मुक्ताफलस्यापि शरोद्भवस्य ॥ 11

शुभे मुहूर्ते प्रयतैः प्रयत्ना-
द्रक्षाविधाना सुमहद्विधेया ।
हर्म्योपरिस्थं क्रियते यदात-
ज्जिज्ञासया रत्नवरं विधिज्ञैः ॥ 12

तदा महादुन्दुभिमन्द्रघोषै-
र्विद्युल्लताविस्फुरितान्तरालैः ।
पयोधराकान्ति विलम्बिबिम्बै-
र्घनाघनैराद्रियतेऽन्तरिक्षम् ॥ 13

न तं भुजङ्गा न तु यातुधाना
न व्याधयो नाप्युपसर्गदोषाः ।
हिंसन्ति यस्याहिशिरस्समस्तं[स्थितं तत्]
मुक्ताफलं तिष्ठति पूज्यमानम् ॥ 14

नाभ्येति मेघप्रभवं धरित्रीं
वियद्गतं ते विबुधा हरन्ति ।
अर्चिःप्ररोहावृतदिग्विभागं
आदित्यवद्दुष्टिविभावबिम्बम् ॥ 15

तेजस्तिरस्कृत्य हुताशनेन्दु-
नक्षत्र(का)[ता]राग्रहजं समस्तम् ।
दिवा यथा दीप्तकरस्तथैव
तमोऽवगाढा (स्त्वपि)[स्वपि] तन्निशासु ॥ 16

Indira Gandhi National

विचित्ररत्नद्युतिचारुतोया
चतुस्समुद्राभरणाभिरामा ।
कृत्स्ना नवा स्यादिति निश्चयो मे
[सर्वा]मही तस्य सुवर्णपूर्णा ॥ 17

हीनोऽपि यस्तल्लभते कथञ्चि-
न्निपातयोगान्महतश्शुभस्य ।
सपत्नहीनां स महीं समस्तां
भुनक्ति....तिष्ठति यावदेव ॥ 18

न केवलं तच्छुभकृन्नृपस्य
भाग्यैः प्रजानामपि तस्य जन्म ।
तद्योजनानां परितस्सहस्रं
सर्वाननर्थान्विमुखीकरोति ॥ 19

नक्षत्रमालेव दिवो विशीर्णा
(दा)[द] न्तावली तस्य महासुरस्य ।
विचित्रवर्णेषु विशुद्धवर्णा
पपात पत्युः पयसां पयस्सु ॥ 20

संपूर्णचन्द्रांशुकलापकान्ते-
र्मणिप्रवेकस्य महागुणस्य ।
तच्छुक्तिजस्य स्थितिमाप बीज-
मासां पराद्ध्यन्यभवानि यानि ॥ (?) 21

यस्मिन्प्रदेशेऽम्बुनिधेः पपात
तच्चारु मुक्ताफलरत्नबीजम् ।

तस्मिन् पयस्तोयधरापकीर्णं
शुक्तिस्थितं मौक्तिकतामुपैति ॥ 22

शुक्त्युद्भवं नास्ति निकृष्टवर्णं
प्रमाणसंस्थानगुणैरुपेतम् ।

उत्पद्यते तत्पुनराकरेषु
नैकेषु चाम्भोनिधिसम्भवेषु ॥ 23

सैंहलिकपारलौकिकसौराष्ट्रिकताम्रपर्णिपार(सिकाः)[शवाः] ।
सौवीर (पाण्ड्य)[कौबेर] वाटकहैमा इत्याकराश्चाष्टौ ॥ 24

बहुलस्निग्धा वृत्ता हंसाभाः सिंहलाकराः स्थूलाः ।
ईषत्ताम्राः श्वेतास्तमोवियुक्ताश्च [ताम्राख्याः] ॥ 25

कृष्णाः श्वेताः पीतास्सशर्कराः पारलौकिका विषमाः ।
न स्थूला नात्यल्पा नवनीतनिभाश्च सौराष्ट्राः ॥ 26

Indira Gandhi National Centre for the Arts

ज्योतिष्मन्तश्शुभ्रा गुरवोऽतिमहागुणाश्च पार(सिकाः)[शवाः] ।
लघु झर्झरं दधिनिभं बृहद्द्विसंस्थानमपि हैमम् ॥ 27

विषमं कृष्णं श्वेतं लघु सौवीरं [कौबेरं] प्रमाणतेजोवत् ।
निम्बफलाकृतिधान्यक(पू )[चू ]र्णनिभाः पाण्ड्यवाटकजाः ॥ 28

अतसीकुसुम(ग्याभं)[श्यामं] वैष्णवमैन्द्रं शशाङ्कसङ्काशम् ।
हरिहयनिभञ्च वारुणमसितं यमदैवतं भवति ॥ 29

परिणतदाडिमगुलिकागुञ्जाताम्रं च वायुदैवत्यम् ।
निर्धूतमनलकणिकानिभं तथा चैवमाग्नेयम् ॥ 30

चिन्त्या न तस्याकरजा विशेषमूल्ये प्रमाणे च........ ।
..........................यतेन पितातः ॥ 31

नच व्यवस्थात्र गुणागुणेषु सर्वत्र सर्वाकृतयो भवन्ति ।
एकस्य शुक्तिप्रभवस्य दृष्टं मुक्तामणेश्शाणसमुद्धृतस्य ॥ 32

मूल्यं सहस्राणि हि रूपकाणां त्रिभिश्शतैरभ्यधिकानि पञ्च ।
यन्माषका (र्णेनततां) [र्षापणतो]....ततश्च भागद्वयहीनमूल्यम् ॥ 33

यन्माषकांस्त्रीन् बिभृयात्सहस्रे द्वे तस्य मूल्यं परमं प्रदिष्टम् ।
अर्धाधिकौ द्वौ विधृतस्य मूल्यं त्रिभिश्शतैरभ्यधिकं सहस्रम् ॥ 34

द्विमाषकोन्मापितगौरवस्य शतानि चाष्टौ कथितानि मूल्यम् ।
अर्धाधिकं माषकमुन्मितस्य सपञ्चविंशत्रितयं शतानाम् ॥ 35

गुञ्जाश्च षट् धारयतश्शते द्वे मूल्यप्रमाणं परमं प्रदिष्टम् ।
उन्मा(न)[प] कोन्मापितभारमेकशताधिकं विंशतिरेव तस्य ॥ 36

गुञ्जा[श्च] तस्रो विधृतं शतार्धं दशाधिकं वाथ लभेत किञ्चित् ।
गुञ्जाश्च तिस्रो विधृतं शतार्धादर्धं लभेताभ्यधिकं त्रिभिर्वा ॥ 37

अतः परं स्याद्धरणप्रमाणं संख्य.................... ।
त्रयोदशानां धरणं धृतानां गुञ्जेति नाम प्र[वदन्ति तज्ज्ञाः] ॥ 38

उन्मापकोन्मापकृतं शतं स्यान्मूल्यं गुणैस्तस्य समन्वितस्य ।
य..........सुपूर्णं धरणं त....चकं वदन्ति तज्ज्ञाः (?) ॥ 39

नवसप्ततिमासु यासु मूल्यं यदि न स्याद्गुणयुक्तितो विहीनम् ।
.............................................................. ॥ 40

त्रिंशद्भिर्धरणं पूर्णं सि[द्ध]....स्त्रीति भाष्यते । ?
चत्वारिंशद्भवेत्तस्य परो मूल्यविनिश्चयः ॥ 41

चत्वारिंशद्भवेत्सिद्धं त्र्यंशमूल्यं लभेत तत् ।
षष्टिं नीकरशिष्टस्य मूल्यं तस्य चतुर्दशम् ॥ 42

अशीतिर्नवतिश्चैव कुप्येति........................ ।
........कादशस्याणबच तस्य मूल्यमनुक्रमात् ॥ (?) 43

शतम........र्णायं....परीकीर्तितः ।
सप्तपञ्चत्रयञ्चैव तस्य मूल्यं प्रकीर्तितम् ॥ 44

........कमेकं यावद्विवर्णेतरणैरहीनम् ।
................................................ ॥ 45

मूल्येन ताव————
........ज्यनावृष्टिहतेऽपि देशे ।

सूक्ष्मातिसूक्ष्मोच............
तन्मौक्तिकानामिह मूल्यमुक्तम् ॥ 46

तज्जातिमात्रे..................................
........णैरहीनस्य तु तत्प्रदिष्टम् ॥ 46½

तारं वृत्तं गुरु स्निग्धं निर्मलं कोमलं तथा ।
षड्भिर्गुणैः समायुक्तं मौक्तिकं गुणवत्स्मृतम् ॥ 47

सितं प्रमाणवत्स्निग्धगुरुस्वच्छसुनिर्मलम् ।
तेजोऽधिकसुवृत्तं च मौक्तिकं गुणवत्स्मृतम् ॥ 48

प्रमाणवद्गौरवरश्मियुक्त............सितं सुवृत्तम् ।
समसूक्ष्मवेधव्यके पनिचैवापहन्ति प्रमोदम् । (?)
............यन्मौक्तिकं तद्गुणवत्प्रदिष्टम् ॥ 49

एवं समस्तेन गुणोदयेन
यन्मौक्तिकं योगमुपागतं स्यात् ।

तस्यैव भर्तारमनर्थजात-
मेकं च किञ्चित्समुपैति जातु ॥ 50

ऋजुवेधगुणस्य [मूल्य]कं
गुरुताकान्तिमतोऽस्य निर्मलस्य ।
परिभावितमेतदत्र सद्भिः
यदविद्धन्तु तदर्धमूल्यमाह ॥ 51

पीतकस्य भवेदर्धमनुवृत्तं विभागभाक् ।
विषमन्त्यश्चजातीनां मूल्यं षड्भागमादिशेत् ॥ 52

यत्तु चन्द्रांशुसङ्काशमीषन्निम्बफलाकृति ।
मूल्या(त्) च सप्तभागोनमावृतत्वाल्लभेत तत् ॥ 53

अवरूपाणि विस्फोटरेखापङ्काङ्कितानि च ।
अताराणि च यानि स्युः कराकारं वहन्ति च ॥ 54

एकादश प्रभावन्ति शकलाश्लेषितानि च ।
यानि चण्डकवर्णानि कांस्यवर्णानि यानि च ॥ 55

मीननेत्रसवर्णानि ग्रन्थिमन्ति च यानि च ।
प्रमाणेनापि युक्तानां मूल्यं यत्किञ्चिदादिशेत् ॥ 56

श्वेतकाचसमं तारं हैमांशशकयोजितम् ।
रसराजिप्रतीवापं मौक्तिकं दैवभूषणम् ॥ 57

एवं सिंहलदेशेषु कुर्वन्ति कुशला नराः ।
एतान्यपि विजानीयान्मौक्तिकानि परीक्षयेत् ॥ 58

यस्मिन् कृत्रिमसन्देहः कचिद्वा मौक्तिके भवेत् ।
कृष्णे सलवणे स्नेहे निशान्तं वासयेज्जले ॥ 59

व्रीहिभिर्मर्दनीयस्स्यात् शुष्कवस्त्रोपवेष्टिनम् ।
न याति यत्तु वैवर्ण्यं विज्ञेयं तदकृत्रिमम् ॥ 60½

॥ इति मौक्तिकपरीक्षा समाप्ता ॥

Indira Gandhi National Centre for the Arts

## ॥ अथ पद्मरागपरीक्षा ॥

दिवाकरस्तस्य महामहिम्नो
महासुरस्योत्तररत्नबीजम् ।
असृग्गृहीत्वा त्वरितं प्रतस्थे
निस्त्रिंशनीलेन नभस्स्थलेन ॥ 1

जेत्रा सुराणां समरेष्वजस्रं
वीर्यावलेपोद्धतमानसेन ।
लङ्काधिपेनार्धपथे समेत्य
स्वर्भानुनेव प्रसभान्निरुद्धम् ॥ 2

तस्सिंहलीचारुनितम्बबिम्ब-
विक्षोभितागाधमहाह्रदायाम् ।
पूगद्रुमच्छन्नतटद्वयायां
मुमोच सूर्यस्सरि(स)[दु] त्तमायाम् ॥ 3

ततःप्रभृति (धा)[सा] गङ्गा तुल्यपुण्यफलोदया ।
नाम्ना रावणगङ्गेति प्रथिमानमुपागता ॥ 4

ततःप्रभृत्येव तु शर्वरीषु (कु)[कू] लानि रत्नैर्निचितानि तस्याः ।
कूलानि कूलप्रकरैरिवान्तर्विभानुसंसक्तटोपलानि ॥ 5

क्वचित्क्वचिद्व्यापिमणिप्रभाभि-
र्विभाव्यमानानि पयांसि तस्याः ।
सुवर्णनाराचशतैरिवान्त-
र्व(नि)[न]प्रदीप्तैर्निचितानि भान्ति ॥ 6

तस्यास्तटेषूज्ज्वलचारुरागाः
भवन्ति तोयेषु तु पद्मरागाः

महागुणा ये स्फटिकप्रसूताः
सौगन्धिकोत्थाः कुरुविन्दजाश्च ॥ 7

बन्धूकगुञ्जाशकलेन्द्रशोभाः
जपाशशासृक्समवर्णशोभाः ।

भ्राजिष्णवो दाडिमबीजवर्णा-
स्तथा परे किंशुकपुष्पभासः ॥ 8

सिन्दूररक्तोत्पलकुङ्कुमाभा
लाक्षारसस्यापि समानवर्णाः ।

स(न्दे)[न्ने] पि रागे प्रभया स्वयैव
भवन्ति लक्ष्यस्फुटमध्यभागाः ॥ 9

भानोश्च भासामनुवेधयोग-
मासाद्य रश्मिप्रकरेण दूरे ।

Indira Gandhi National Centre for the Arts

पार्श्वानि सर्वाण्यनुरञ्जयन्ति
गुणोपपन्नाः स्फटिकप्रसूताः ॥ 10

कुसुम्भनीलव्यतिमिश्ररागाः
प्रत्यग्ररक्ताम्बरतुल्यभासः ।

तथा परे चित्रककण्टकारी-
पुष्पत्विषो हिङ्गुलिका(वि)[त्वि] षोऽन्ये ॥ 11

चकोरपुंस्कोकिलसारसानां
नेत्रावभास द्वि[द्यु] त(या)[य] श्च केचित् ।

अन्ये पुनर्नापि विपुष्पितानि
तुल्यत्विषः कोकनदोदराणाम् ॥ 12

प्रभावकाठिन्यगुरुत्वयोगैः
प्रायस्समानां स्फटिकोद्भवानाम् ।
आनीलरक्तोत्पलचारुभासां 13
सौगन्धिकोत्था मणयो भवन्ति ॥

कामं तु रागः कुरुविन्दजाना
मप्यस्ति यादृग्भवनानि........ ।
......................हला भवन्ति 14
प्रभाववन्तोऽपि न तैस्समस्तैः ॥

ये तु रावणगङ्गायां जायन्ते कुरुविन्दजाः । 15
पद्मरागायनं........विभ्राणा न स्फुटार्चिषः ॥

वर्णानुयायिनस्तेषा (म)[मा] न्ध्रदेशे तथा परे । 16
जायन्ते ते तु यत्किञ्चिन्मूल्यं लेशमवाप्नुयुः ॥

तथैव स्फटिकोत्थानां देशे तुम्बुरुसञ्ज्ञिते । 17
समागमात्प्रजायन्ते स्वल्पमूल्या हि ते स्मृताः ॥

वर्णाधिक्यं प्रयत्नेन विद्वांस्तानुपलक्षयेत् । $17\frac{1}{2}$

कालपुरोद्भवसिंहलतुम्बुरुदेशोत्थमुत्तम(लेया)[मं तु स्यात्] । 18
श्रीपूर्ण(यश्च)[जाश्च] सदृशा विजातयः पद्मरागाणाम् ॥

तुषोपसर्गान्कलशाभिधान-
माताम्रभावादपि तुम्बुरूत्थम् ।
कर्ण्यातितं सिंहलदेशजातं
मुक्ताभिधानं नभसास्य भावम् ॥ 19

Centre for the Arts

श्रीपूर्णजं दीप्तिनिराकृतां (तं) च
द्विजातिलिङ्गाश्रय एष भेदः ।

स्नेहार्द्रदेहो लघुता गुरुत्वं
विजातिलिङ्गं खलु सार्वजन्यम् ॥ 20

दोषोपसृष्टं मणिमप्रबोधात्
बिभर्ति यः कञ्चन किञ्चिदेव ।

तत्रत्यदुःखामयबुद्धिवित्त-
नाशादयो दोषगुणा भजन्ते ॥ 21

ये शर्कराच्छिद्रमलोपदिग्धाः
प्रभाविमुक्ताः परुषा विवर्णाः ।

न ते प्रशस्ता मणयो भवन्ति
समासतो जातिगुणैरुपेताः ॥ 22

यस्ताम्रतां पुष्यति पद्मरागो
यो वा तुषाणामिव पूर्णमध्यः ।

स्नेहप्रदिग्धश्च विभाति यो वा
यो वा प्रमृष्टः प्रजहाति दीप्तिम् ॥ 23

आक्रान्तमूर्च्छो च तथाङ्गुलीभ्यां
यः कालिकां पार्श्वगतां बिभर्ति ।

सम्प्राप्य चेत्क्षेपतरङ्गवृत्ति-
बिभर्ति यः सर्वगतामतीव ॥ 24

तुल्यप्रमाणस्य च तुल्यजात-
यों मा [वा]गु(रू त्वे)[रुत्वे] न भवे(त)[तु] तुल्यः ।



Indira Gandhi National Centre for the Arts

प्राप्यानि रत्नाकारमध्यदेश-
जातिं बुधो जातिनयेन पश्येत् ॥ 25

जातस्य सर्वस्य मणेर्न जातु
विजातयः सन्ति समं न भासः ।
तथापि नानाकरणार्थमेषां
भेदप्रकारोपनयं प्रदिष्टम् ॥ 26

अप्रणश्यति सन्देहे शाणायां तत् परीक्षयेत् ।
स्वजातिकासमुत्थेन विलिखेद्वा परस्परम् ॥ 27

वज्रं कुरुविन्दं वा विरच्यान्येन केनचित् ।
न शक्यं लेखनं कर्तुं पद्मरागेन्द्रनीलयोः ॥ 28

गुणोपपन्नेन सहावबन्धो
मणिस्तु धार्योऽपि........य जातयः ।
न कौस्तुभेनापि सहावबन्धं
विद्वा विजातिं बिभृयात्कदाचित् ॥ 29

चण्डाल एकोऽपि यथा द्विजातीन्
समेत्य भूरीनुप(यन्त्य)[यात्य] यत्नात् ।
तथा मणीन्भूरिगुणोपपन्नान्
शक्नोति विद्वावयि(ता)[तुं] (द्वि)[वि]जातिः ॥ 30

गुणशतमपि दोषः कश्चिदेको विवृद्धः
क्षपयति यदि न स्यात्तद्विरोधी गुणोऽन्यः ।
घटशतमपि पूर्णं पञ्चगव्येन शत्त्या
मलिनयति सुराया बिन्दुरेकोऽपि सर्वम् ॥ 31

॥ इति पद्मरागपरीक्षा समाप्ता ॥

---

Indira Gandhi National Centre for the Arts

## ॥ अथ मरतकपरीक्षा ॥

दानवाधिपतेर्वित्तमादाय भुजगाधिपः ।
द्विधा कुर्वन्निव व्योम त्वरितं वासुकिर्ययौ ॥ 1

स तदास्यशिरोरत्नप्रभादीप्ते नभोऽम्बुधौ ।
रजतः सुमहानेकः क[ख]ण्डसेतुरिवाबभौ ॥ (?) 2

ततः (पक्षपिता तेन) [पक्षवितानेन] संहरन्निव रोदसी ।
गरुत्मान् गगने तस्य तद्धर्तुमुपचक्रमे ॥ 3

सहसैव मुमोच तत्फणीन्द्रः
स्वरसाभ्यक्ततुरुष्कपादपायाम् ।
नलिनीवनगन्धवासितायां
धरणीन्द्रस्य गिरेरुपत्यकायाम् ॥ 4

Indira Gandhi National
Centre for the Arts

तस्मिन्पपात समनन्तरकारकाल-
मेतद्वरालयमतीत्य रमासमीपे ।
स्थानं स्थितेरुपपयोनिधितीरलेखं
तत्प्रत्य[या] न्मरतकाकरतां जगाम ॥ 5

तत्र........कठोर........कण्ठशिरीषपुष्प-
खद्योतपृष्ठनवशाद्वलशैवलाभाः ।
काष्णीरसस्य (क)[च] भुजङ्गभुगग्रपिञ्छ-
तुल्यत्विषो मरतका मणयो भवन्ति ॥ 6

तत्रैव किञ्चित्पतितं स वित्तं
जग्राह खे (समपति)[सपदि संप्र]गतो गरुत्मान् ।

मूर्च्छापरीतस्सहसैव नासा-
रन्ध्रद्वयेन प्रमुमोच चाशु ॥ (?) 7

यद्यत्र भोगीन्द्रभुजा (द्वि)वि मुक्तं
पपात वित्तं दितिजेश्वरस्य ।
तस्याकरस्यातितरां स देशो
दुःखोपलभ्यश्च गुणैश्च मुक्तः ॥ 8

यस्मिन्मरतकस्थाने यत्किञ्चिदुपजायते ।
सर्वं च विषवे(शा)[गा] नां प्रशमाय प्रकल्पते ॥ 9

सर्वमन्त्रौषधिगुणैर्यन्न शक्यं चिकित्सितुम् ।
महाहिदंष्ट्राप्रभवं विषं तत्तेन शाम्यति ॥ 10

अन्यदप्याकरे तस्मिन् यद्दोषैः परिवर्जितम् ।
जायते तत्पवित्राय चोत्तमं सर्वतो हितम् ॥ 11

अत्यन्तहरितवर्णं सुकुमारा—ष्टतानजटिलं च ।
काञ्चनपूर्णैरस्तं सुपूर्णमिव लक्ष्यते यच्च ॥ 12

संस्थानगुणैर्युक्तं समरागं गौरवेण चाहीनम् ।
सवितुः करसंस्पर्शाच्छुध्यति यच्चाश्रयं दीप्त्या ॥ 13

भित्त्वा च हरिभो वयस्यान्तरभेदसमभवा दीप्तिः । (?)
अचिरप्रभाप्रभावा नवशाड्वलसन्निभा भाति ॥ 14

यच्च मनसः प्रसादं विदधाति निरीक्ष्माणमतिमात्रम् ।
तन्मरतकं महागुणमिति रत्नविदां मनोवृत्तिः ॥ 15

वर्णस्यातिमहत्त्वे यदपि च सुस्वच्छकरणपरीवारः ।
सान्द्रं देहविशुद्धं कोलम्बहलप्रभादिग्धम् ॥ 16

वर्णोद्भवाय कान्त्या सान्द्राकारावभासमायाति ।
तदपि च गुणवत्संज्ञामाप्नोति न यादृशी पूर्वम् ॥ 17

शबरं जरठं मलिनं रूक्षं पाषाणशर्कराभिन्नम् ।
श्लिष्टं च शिलाजतुका मरकतमेवंविधं विगुणम् ॥ 18

यत्सन्धिश्लेषितं रत्नं अन्यन्मरतकादृते ।
श्रेयस्करैर्न तद्धार्यं विक्रेतव्यं कथञ्चन ॥ 19

भल्लातकः पुत्रिका च तद्वर्णस्यानुयायिनः ।
मणेर्मरतकस्यैते लक्षणीया विजातयः ॥ 20

क्षौमोर्णवाससा स्पृष्टा दीप्तिं त्यजति पुत्रिका ।
छेदनेनैव काचस्य शक्या कर्तुं विभावना ॥ 21

कस्य चिदनेकरूपैर्मरतकमनुगच्छतो विगुणयोगैः ।
भल्लातकस्य नान्तर्वैशद्यमुपैति वर्णस्य ॥ 22

स्नानाचमनजप्येषु रत्नमन्त्रक्रिया(नि)[वि]धौ ।
ददद्भिर्गोहिरण्यादि कुर्वद्भिस्साधनानि च ॥ 23

देवाग्निगुरुपूजासु(चित्राव)[पित्रोर] तिथिपूजने ।
बाध्यमानैश्च विविधैर्दोषजातैर्विषोद्भवैः ॥ 24

दोषैर्मुक्तं गुणैर्युक्तं काञ्चनप्रतियोजितम् ।
सङ्ग्रामं प्रविशद्भिर्वा धार्यं मरतकं युतम् ॥ 25

यथा च पद्मरागाणां दोषैर्मूल्यं प्रहीयते ।
तथास्याभ्यधिका हानिर्दोषैर्मरतकस्य च ॥ 26

हरितममलमच्छं निर्व्रणं नित्यरागं
गुरुतरचतुरश्रं कोमलं मुद्गवर्णम् ।

हृदयनयनकान्तं तेजसा चैव युक्तं
मरतकमिति तज्ज्ञैः प्रेक्ष्यते लक्ष्यमूलम् ॥ 27

वज्रं विहाय रत्नानां मणयो ये विजातयः ।
तेषामप्रतिबद्धानां भा भवत्यूर्ध्वगामिनी ॥ 28

ऋज्वागतत्वात्केषाञ्चित् कथञ्चिदुपजायते ।
तिर्यगालो(च्य)[क्य] मानानां सापि यैव विनश्यति ॥ 29

॥ इति मरतकपरीक्षा समाप्ता ॥

---

## ॥ अथ इन्द्रनीलपरीक्षा ॥

तत्रैव सिंहलवधूकरपल्लवाग्र-
व्यालूनलोललवलीमुकुलप्रवालैः ।
देशे पपात दितिजस्य नितान्तनील-
(लो(त्रा)[ध्रा]कभिन्नकेतकवनप्रतिबद्धरेखा) ॥
(सान्द्रेन्द्रनीलमणि—रता बभूव) ॥ १ 1

Gandhi National
ntre for the Arts

आलासिताब्जहलमृद्धसनाद्रिपृष्ठे
शार्ङ्गायुधाङ्गगरकण्ठकलापपुष्पैः ।
शुक्लेतरैश्च कुसुमैर्गिरिकर्णिकाया-
स्तस्यां भवन्ति मणयस्सदृशावभासाः ॥ 2

अन्ये प्रसन्नपयसां——निधातु-
रम्बु(द्वि)[त्वि]षो गिरिशकण्ठनिभास्तथाऽन्ये ।
नीलीरसप्रभववन्युदसन्निभाश्च
केचित्तथा समदकोकिलकण्ठभासः ॥ 3

एवंप्रकारा [बहवः] स्पष्टवर्ण[वि] शोभिनः ।
जायन्ते मणयस्तत्र इन्द्रनीला महागुणाः ॥ 4

(मु)[? मृ]त्पाषाणसिरारन्ध्रकरत्रपसुसंयुताः ।
अभ्रकोऽल्पदलच्छायावर्णदोषैश्च दूषिताः ॥ 5

यस्मिन्नेवं वत्रजन्ते मणयः खलु भूरियम् ।
शास्त्रसंबोधितधियः तन्न[शंसन्ति]सूरयः ॥ 6

धार्यमाणस्य ये दृष्टाः पद्मराग[मणेर्गुणाः] ।
धारणादिन्द्रनीलस्य तानेवाप्नोति मानवः ॥ 7

यथा वा पद्मगागाणां जातकत्रितयं भवेत् ।
इन्द्रनीलेष्वपि तथा द्रष्टव्यमविशेषतः ॥ 8

परीक्षाप्रत्यया ये वै पद्मरागपरीक्षणे ।
तथैव प्रत्यया हि स्युरिन्द्रनीलमणेरपि ॥ 9

Centre for the Arts

यावन्तश्च सहैतानि पद्मरागप्रयोगतः ।
इन्द्रनीलमणिस्तस्मात् सहैतानि महत्तरम् ॥ 10

तथापि न परीक्षार्थं गुणानां वा विशुद्धये ।
मणिरत्नैः समावेयः कदाचिदपि कश्चन ॥ 11

अग्निमात्रपरिज्ञानाद्दाहदोषविदूषितः ।
सोऽनर्थाय भवेद्भर्तुः कर्तुः कारयितुस्तथा ॥ 12

कायोपलकरुव्याणां समाश्च स्फटिकादयः ।
इन्द्रनीलमणिच्छायासदृशास्तु विजातयः ॥ 13

एतेन सदृशमणिनेन्द्रनीलेन गुरुभावकठिनभावावेतेषां दृश्य[श्ये[ते ।
कचात्यथावदुत्तरविवर्धमानो विशेषेणेन्द्रनीलो यथ........कश्चित्

विभत्यताम्रवर्णताम्रवर्णताम् । (?)
लक्षणीयौ तथा ताम्रौ करपूरौ पलावुभौ ।
यस्य मध्यगता भाति नीलस्येन्द्रायुधप्रभा ॥ 14

तमिन्द्रनीलमित्याहुर्महार्घं भुवि दुर्लभम् ।
यस्तु वर्णस्य भूरित्वात क्षीरे शतगुणे स्थितम् ॥ 15

नीलतां तु नयेत्सर्वं स महानील उच्यते ।
अनीलः पाण्डुपाषाणः पुष्यरागोऽभिधीयते ॥ 16

तमेव लोहितं पीतं प्राहुः कोरण्डकं बुधाः ।
आलोहितमपीतं तु स्वच्छकाषायकं विदुः ॥ 17

इन्द्रनीलं सुनीलत्वात् पद्मरागस्तु लोहितः ।
आनीलश्शुक्लसिद्धश्च मणिस्सोमालकः स्मृतः ॥ 18

एष वर्णप्रकारस्तु वर्णविद्भिरुदाहृतः ॥ 18½

यत्पद्मरागस्य महागुणस्य
मूल्यं भवेन्माषकमुन्मितस्य ।

तदिन्द्रनीलस्य महागुणस्य
सुवर्णसंख्यातुलितस्य मूल्यम् ॥ 19

इन्द्रनीलमहानीलपुष्यरागपरीक्षणम् ।
कोरण्डकाख्यकाषायसोमालकसमन्वितम् ॥ 20½

॥ इति इन्द्रनीलपरीक्षा समाप्ता ॥

Indira Gandhi National Centre for the Arts

## ॥ अथ वैडूर्यपरीक्षा ॥

कल्पान्तकालक्षुभिताम्बुराशि-
निर्ह्रादकल्पाद्दितिजेन्द्र(वा)[ना]दात् ।
वैडूर्यमुत्पन्नमनेकवर्णं
शोभाभिरामद्युति रत्नवर्यम् ॥ 1

अविदूरे विडूर्यस्य गिरेरुत्तुङ्गरोधसः ।
कोगचोलिकसीमान्ते मणेस्तस्याकरोऽभवत् ॥ 2

तत्प्रत्ययसमुत्थत्वादाकरस्य महागुणः ।
भूमौ रत्नार्पिततलो लोके स प्रथितोऽभवत् ॥ 3

तस्यैव दानवपतेर्निनदानुरूप-
प्रावृट्पयोधररवाद्वसुधां विभिद्य ।
वैडूर्यरत्नमणयो विविधावभासो
वह्निस्फुलिङ्गनिवहा इव निष्पतन्ति ॥ 4

पद्मरागमुपादाय मणिराशि(मिथि)[रिह]क्षितौ ।
सर्वास्ता वर्णतो भाभिर्वैडूर्यमनुगच्छति ॥ (?) 5

तेषां प्रधाने शशिकण्ठनीलो
यो वा भवेद्वेत्रदलप्रकाशः ।
माषस्य पत्रान्तसमद्युतिर्वा
नान्ये प्रशस्ता मणिविद्भिरुक्ताः ॥ 6

गिरिकाचशैशुपालककाचस्फटिकाश्च धूमनिर्भिन्नाः ।
वैडूर्याणामेते विजातयस्सन्निभास्सन्ति ॥ 7



Indira Gandhi National Centre for the Arts

लाक्षायोगात्काचा लघु(पालात) [भावात्] शैशुपालकं चैव ।
विद्या[त] गिरिंच दीप्त्या स्फटिकं वर्णोज्ज्वलेनैव ॥ 8

यदिन्द्रनीलस्य महागुणस्य
सुवर्णसंख्याकलितस्य मूल्यम् ।

तदेव वैडूर्यमणेः प्रदिष्टं
पलद्वयोन्मापितगौरवस्य ॥ 9

सुखोपलक्ष्यो हि सदा विचार्यो
विधिस्त्वयं शास्त्रविदादरेण ।

स्नेहप्रदेहो मृदुता लघुत्वं
व्रजन्ति लिङ्गं खलु सार्वजात्यम् ॥ 10

उपेतोऽपि हि वर्णेन दीप्ति(गो)[शो] भाविवर्जितः ।
महार्घं न मणिर्याति प्रभावाच्च प्रहीयते ॥ 11

Indira Gandhi National
Centre for the Arts

कुशलः......................प्रैज्यमानाः
प्रतिबद्धाः प्रतिसर्य प्रतियोगैः ।(?)

गुणदोषसमुद्भवं लभन्ते
मणयो मूल्यमिहाहुरार्यलोकाः ॥ 12

क्रमशः समतीत्य सर्वशाणाः
प्रतिबद्धाः कुशलेन होमकर्त्रा ।

यदि नाम भवन्ति दोषहीना
मणयः षड्गुणमाप्नुवन्ति मूल्यम् ॥ 13

आकरात्समतीतानामुदधेस्तीरसन्निधौ ।
मूल्यमेतन्मणीनां तु न तु सर्वत्र भूतले ॥ 14

सुवर्णं मनुना प्रोक्तं पूर्वषोडशमाषकाः ।
तस्य सप्ततिभागस्य संज्ञारूपकमिष्यते ॥ 15

त्रयः कुलुत्था गुञ्जा तु पञ्चगुञ्जास्तु माषकाः ।
गुञ्जाद्वात्रिंशमित्याहुर्धरणं रत्नकोविदाः ॥ 16

॥ इति वैडूर्यपरीक्षा समाप्ता ॥

---

## ॥ अथ कर्केतनपरीक्षा ॥

वायुर्वसां दैत्यपतेर्गृहीत्वा
चिक्षेप सम्यग्यवने प्रहृष्टम् ।
तत्र प्रसूता मणयः प्रसन्नाः
कर्केतनाः पूज्यतमा भवन्ति ॥ 1

वर्णेन तद्रुधिरसान्द्रमधुप्रकाश-
माताम्रपीतकनकज्वलितं विभाति ।
प्रत्यग्रसूर्यकिरणज्वलनप्रकाशं
सन्ध्यारुणामलमनोज्ञविशुद्धवर्णम् ॥ 2

कुलसुतधनधान्यवृद्धिसौख्यं
विषगतशोकमपाकरोति चाशु ।
कनकशतमपीष्टमस्य मूल्यं
कलुषविनीलविवर्जितस्य तस्य ॥ 3

॥ इति कर्केतनपरीक्षा ॥

---

## ॥ अथ पुलकपरीक्षा ॥

पुण्येषु पर्वतवनेषु च निम्नगासु

स्थानान्तरेषु च तथोच्चतरेषु ग(ता)[त्वा] ।

संस्थापिता नरवरा हि गजैः प्रकाशं

सम्पूज्य दानवपतेः प्रथितप्रदेशे ॥ 1

दशार्णतारापुरमेखलादौ गुञ्जादलद्राक्षमृणालवर्णाः ।

........................................................ ॥ 2

बिल्वार्कशुभ्रकदलीकसमानगात्रा-

श्चत्वार एव पुलकाः खलु ते प्रसूताः ।

शङ्खाम्बुजध्वजभुजङ्गविचित्रिताङ्गाः

........................................ ॥ 3

Indira Gandhi National Centre for the Arts

*सूत्रैरुपेता(?) [पञ्च]विंशतितत्त्वानि पुरुषः प्रकृतेः (पृथक्) [परम्] ।

जानतो योगसिद्धिस्स्याद्योग[दोष] क्षयो भवेत् ॥ 1

पञ्चविंशतितत्त्वानि पुरुषः प्रकृ(ते)[ति] र्महान् ।

अहङ्कारश्च तन्मात्रा विकाराश्चापि षोडश ॥ 2

(पञ्च)[महा] भूतानि चेत्येवमृषिणैव सुविस्तृतम् ।

ज्ञानमात्रेण मुक्तिः स्यादि(ति चास्यैव)[त्यालस्यस्य)लक्षणम् ॥ 3

ज्ञानिनोऽपि भवत्यत्र दोषैर्बुद्धि(भयं)[भ्रमः] क्वचित् ।

गुरूपदिष्टविद्यातो नष्टाविद्योऽपि पूरुषः ॥ 4

---

* अत्र पुलकरुधिराक्षस्फटिकनिरूपणभागे ग्रन्थपात इव लक्ष्यते । पञ्चविंशतितत्वानीत्यारभ्य, तत्राविद्यैव कारणम्, इत्यन्तो भागः प्रकृतासंबद्धो लक्ष्यते । आदर्शे उपलंभान्मुद्रितः ॥

देहदर्पणदोषांस्तु योगेनैव विनाशयेत् ।
सम्यग्ज्ञातो रसो यद्वद्गुलादेर्नानुभूयते ॥ 5

पित्तज्वरयुतैस्तस्माद्दोषानेव विनाशयेत् ।
गुरूपदिष्टविद्यस्य विरक्तस्य नरस्य तु ॥ 6

दोषक्षयकरस्तस्मा(द्दीषा)[द्योगा] दन्यो न विद्यते ।
अविद्योपात्तकर्तृत्वात्का(म्यन्) [मात्] कर्माणि कुर्वते ॥ 7

ततः कर्मविपाकेन जात्यायुर्भोगसंभवः ।
पञ्च क्लेशास्त्वविद्या च रागद्वेषौ तदुद्भवौ ॥ 8

अस्मिताभिनिवेशौ च (य)[त] त्राविद्यैव कारणम् । 8½
प्रकाशजलशुद्धाख्यमुत्पन्नस्फटिकं ततः ॥

(हत्का)[धृत्वा] च शङ्खं (प)[ध]वलं किञ्चिद्वर्णान्वितं शुभम् ॥ 4
न तुल्यसारं नृणां च तथैवाशुभसाधनम् ।

सम्यक्कृतं शिल्पविदा किञ्चिन्मूल्यं भवेत्तु तत् ॥ 5

॥ इति स्फटिकपरीक्षा ॥

Indira Gandhi National Centre for the Arts

---

## ॥ अथ विद्रुमपरीक्षा ॥

मीनपक्षोज्ज्वलो नानाविद्रुमस्सागरे किल ।
उमासमीपे पतितो जलमध्ये प्रतिष्ठितः ॥ 1

आदाय मांसं यम उग्रकर्मा
तस्यामरारेर्विससर्ज तस्मिन् ।

तत्र प्रधानं शशलोहिताभं

गुञ्जाजपापुष्पनिभं प्रसूतम् ॥ 2

स्वल्पीयकं सुखवदागमरोमतं च

स्थानानि तेष्वपि समं सुलभं सुरागम् ।

अन्यत्र जातं न तु तत्प्रधानं

मूल्यं भवेच्छिल्पविशेषितानाम् ॥ 3

प्रसन्नं कोमलं स्निग्धं सुरागं विद्रुमं हि तत् ।

धनधान्यकरं (आ)[ना] गविषादिभयनाशनम् ॥ 4

तत्र पुरा इह सूनुना समासोक्तिः(?) ।

मणिशास्त्राणां (मरुता)[महतां] बुद्धभटेनाक्षयेणेयम् ॥

इति वज्रमौक्तिकपद्मरागमरतकेन्द्रनीलवैडूर्यकर्केतनपुलकरुधिराक्षस्फटिकविद्रुमाणां बीजाङ्कुरगुणदोषकृत्रिममूल्यपरीक्षा, धारयितुः दोषगुणानां च, महन्नियोगेन विस्तरतोऽसौ बुद्धभटेन निर्दिष्टा (?) ॥

Indira Gandhi National Centre for the Arts

॥ इति बुद्धभटीयं नाम रत्नशास्त्रं

समाप्तम् ॥

IGNCA RAR
ACC. No. R-216

Indira Gandhi National
Centre for the Arts